This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2457 विषय धर्मशास्त्र

नाव फलधारा महात्म्य

लेखक/लिपीकार

पृठ 44 काळ पूर्ण/अपूर्ण

M2457

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥*॥ अथ मलमासमाहात्म्यं प्रारभ्यते ॥*॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीपुरुषोत्तमाय नमः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ श्रीसांबमूर्त्तयेनमः ॥ एकदासुनयःसर्वेनैमिषारण्यवासिनः ॥ विशालायांरतायेचहरिद्वारनिवासिनः ॥ १ ॥
सशिष्यास्तेसमागम्यशौनकाद्याधृतव्रताः ॥ प्रोचुःसूतंसुखासीनंव्यासशिष्यमकल्मषम् ॥ २ ॥ ॥ ऋषयऊचुः ॥ ॥ अधिमासव्रतं
ब्रूहिसूतजीवाचिरंसुखम् ॥ श्रुतंव्यासमुखाद्यच्चविधानमपिनोवद ॥ ३ ॥ मलमासविधानेतुकोविधिःकाचदेवता ॥ कस्मिन्मासेतिथौ
कस्यांकिंफलंकथयाशुनः ॥ ४ ॥ सूतउवाच ॥ ॥ शृणुध्वमृषयःसर्वेकथांपौराणिकींशुभाम् ॥ लक्ष्मीमाधवसंवादंशृण्वतां
पापनाशनम् ॥ ५ ॥ एकदासुखमासीनंदेवदेवंजनार्दनम् ॥ पप्रच्छदेवीभर्त्तारंमहालक्ष्मीश्चमाधवम् ॥ ६ ॥ ॥ श्रीरुवाच ॥ ॥
देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक ॥ कथयस्वप्रसादेनसंशयोहृदिसंस्थितः ॥ ७ ॥ मुनीश्वराःप्रवदंतिकृष्णद्वैपायनादयः ॥ अदत्तंनै
वलभ्येतदत्तंचैवोपतिष्ठति ॥ ८ ॥ यथावंध्यागृहस्थस्यपतिवंशविनाशिनी ॥ तथादानविहीनंतुजंतोर्जन्मनिरर्थकम् ॥ ९ ॥ तथापिकथ
यंतीहदैवज्ञाःशास्त्रकोविदाः ॥ मलिम्लुचेतुसंप्राप्तेक्रियाः सर्वाःपरित्यजेत् ॥ १० ॥ युक्तायुक्तंयदादेवपूर्वाचार्यैर्यथोदितम् ॥ देवकार्यं
पितृकार्यंतीर्थयात्राव्रतादिकम् ॥ ११ ॥ क्षौरंमौंजीविवाहौचव्रतंकाम्योपवासिकम् ॥ मलिम्लुचेसदात्याज्यंगृहस्थैश्चविशेषतः ॥ १२ ॥अधि
मासेतुसंप्राप्तेकिंकार्यं ब्रूहिमेप्रभो ॥ कस्योद्देशेनदातव्यंकर्तव्यंकस्यपूजनम् ॥१३ ॥विष्णुरुवाच ॥ ॥ शृणुदेविमहाभागेसर्वलोकस्यहेतवे ॥
स्वयंदातास्वयंभोक्तायोददातिद्विजातये ॥१४॥ नान्योदातानभोक्तान्यइहलोकेपरत्रच ॥ असंक्रांतेतुसंप्राप्तेमामुद्दिश्यव्रतंचरेत् ॥१५॥ अधि
मासस्याधिपतिरहंवैपुरुषोत्तमः ॥ स्नानंदानंजपोहोमःस्वाध्यायःपितृतर्पणम् ॥ १६ ॥ देवार्चनंतथाचैवयेऽर्चयंतिनराइह ॥ अक्षय्यंतद्भवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सर्वमामुद्दिश्यचयत्कृतम् ॥ १७ ॥ मलमासोगतःशून्योयेषांदेविप्रमादतः ॥ दारिद्र्यंपुत्रशोकंचपापपंकेनगर्हिताः ॥ १८ ॥ तेषांसुखप्रदोहंच
येर्चयंतिद्विजोत्तमान् ॥ तेषांदास्याम्यहंकांतेस्वल्पंदत्तंत्वनंतकम् ॥ १९ ॥ लक्ष्मीरुवाच ॥ यदिनाथत्वयाप्रोक्तमहमेवप्रदायकः ॥ केनत्वंप्री
तिमायासिलोकानांव्रतचारिणाम् ॥ २० ॥ प्रसादसुमुखोभूत्वामलमासव्रतंवद ॥ उद्यापनंचविधिवदितिहाससमन्वितम् ॥ २१ ॥ विष्णुरुवाच ॥
असंक्रांतोयदामासःप्राप्यतेमानवैःप्रिये ॥ महोत्सवस्तदाकार्यआत्मनोहितकांक्षिभिः ॥ २२ ॥ कृष्णपक्षेचतुर्दश्यांनवम्यांवासुरेश्वरि ॥ अष्ट
म्यांचैवकर्त्तव्यंव्रतंशोकविनाशनम् ॥ २३ ॥ यथालाभोपहारेणमासेचास्मिन्मलिम्लुचे ॥ पुण्येह्निप्रातरुत्थायकृत्वापूर्वाह्णिकींक्रियाम् ॥ २४ ॥
गृह्णीयान्नियमंपश्चाद्वासुदेवंहृदिस्मरन् ॥ उपवासस्यनक्तस्यचैकभक्तस्यभामिनि ॥ २५ ॥ एकस्यनिश्चयंकृत्वाततोविप्रान्निमंत्रयेत् ॥
सपत्नीकान्सदाचारान् स्मार्त्तांश्चवैदिकांस्तथा ॥ २६ ॥ श्रुत्यध्ययनसंपन्नान्कुलीनान्मितभाषिणः ॥ ततोमध्याह्नसमयेलक्ष्मीयुक्तंसनात
नम् ॥ २७ ॥ स्थापयेदव्रणेकुंभेवेदमंत्रैर्द्विजोत्तमैः ॥ पूजयेत्परयाभक्त्यागोत्रिभिःपुरुषोत्तमम् ॥ २८ ॥ शुचितोयेनसंस्नाप्यपंचामृतयुते
नच ॥ चंदनेनसुगंधेनपुष्पैर्नानाविधैःप्रिये ॥ २९ ॥ मिष्टान्नैर्नवनैर्वेद्यंधूपैर्दीपैस्तुपूजयेत् ॥ आच्छादनंसुवस्त्रैश्चमहामूल्यैर्विशेषतः ॥ ३० ॥
घंटामृदंगघोषैश्चशंखध्वनिसमन्वितैः ॥ आरार्त्तिकंव्रतीकुर्यात्कर्पूरागरुचंदनैः ॥ ३१ ॥ अलाभेचोदकेनापिफलस्यानंत्यहेतवे ॥ ताम्रपा
त्रस्थितंतोयंचंदनाक्षतपुष्पकम् ॥ ३२ ॥ अर्घ्यंदद्यात्सपत्नीकःप्रहृष्टेनांतरात्मना ॥ मंत्रेणानेनदेवेशिब्राह्मणैः सहमांस्मरन् ॥ ३३ ॥
देवदेवमहाभागप्रणतार्तिहराच्युत ॥ गृहाणार्घ्यमयादत्तंसर्वकामप्रदोभव ॥ ३४ ॥ अर्चयित्वार्घ्यदानेनब्राह्मणान्पूजयेत्ततः ॥ सपत्नी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काञ्छुचीञ्छांतान्मधुचूर्णैःसुभोजनैः ॥ ३५ ॥ स्मर्तव्योद्विजरूपेणतत्पत्नींत्वामनुस्मरन् ॥ परिधाययथाशक्त्यावस्त्रालंकारचंद
नैः ॥ ३६ ॥ द्राक्षाम्रककपित्थैश्चपनसैःकदलीफलैः ॥ खर्जूरैर्नारिकेलैश्चनारिंगैर्दाडिमैःप्रिये ॥ ३७ ॥ घृतपक्वान्नगोधूमैर्माषान्नैःस्वा
दुतत्परैः ॥ ऊर्वारुकर्कटीशाकैःशृंगवेरैःसमूलकैः ॥ ३८ ॥ राजमाषभवैःशाकैःपिष्टतक्रोष्णसंभवैः ॥ अन्यैश्चविविधैःशाकैःसमपक्वैः
पृथक्पृथक् ॥ ३९ ॥ भक्ष्यंभोज्यंचलेह्यादिकटुकानिविशेषतः ॥ गोरसैश्चविचित्रैस्तुजलैरेलासुवासितैः ॥ ४० ॥ तथाह्यवसरंप्राप्य
परिकंप्यमृदुब्रुवन् ॥ इदंस्वादुइदंभोज्यंभवदर्थेनिवेदितम् ॥ ४१ ॥ धन्योस्म्यनुगृहीतोस्मिसार्थकंममंदिरम् ॥ विसर्जये
त्ततोविप्रान्दत्त्वातांबूलदक्षिणाम् ॥ ४२ ॥ पत्राणिपूगखंडानिचूर्णंचखदिरंशुभम् ॥ कर्पूरैलालवंगादिजातीफलतजत्वचा ॥ ४३ ॥
चतुर्भिर्मिलितैर्देवितांबूलंममवल्लभम् ॥ मृगनाभिमरीचानिसुरमांसीनखांस्तथा ॥ ४४ ॥ योददातिद्विजाग्रेभ्यःसभवेत्सुखभाङ्नरः ॥ सुभग
श्चसदाचारोवल्लभश्चजनेशुभे ॥ ४५ ॥ सुंदरीसुभगाचैवकामिनीपतिवल्लभा ॥ पुत्रसौभाग्यसंयुक्तातांबूलाज्जायतेबला ॥ ४६ ॥ पत्रैस्तुकेशवः
प्रीतःपूगैरीशःसहांबया ॥ चूर्णेनैवानलःप्रीतःखदिरेणचमन्मथः ॥ ४७ ॥ चतुर्भिर्मित्रावरुणौयःपुष्णातिजगत्त्रयम् ॥ परितोष्यसपत्नीकान्
हस्तेदत्त्वाचमोदकान् ॥४८॥ आसीमांतमनुव्रज्यभुंजीतबंधुभिःसह ॥ मलमासव्रतंनारीयाकरोतिसमुद्रजे ॥४९॥ नवैधव्यंनदारिद्र्यंपुत्रशोकः
कदाचन॥पुरुषोवैभवेद्देवियदिकुर्यान्मलिम्लुचम् ॥५०॥ ॥ इति श्रीपद्मपुराणेप्रथमार्द्धेश्रीकृष्णसंवादेमलमासमाहात्म्येप्रथमोऽध्यायः ॥१॥

---

१ वालुक । २ आलें । ३ चवळ्या । ४ कढी । ५ तिखट । ६ जायपत्री । ७ कस्तूरी । ८ नखला । ९ हे लक्ष्मि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णउवाच ॥ ॥ माहात्म्यंशृणुदेवेशिमलमासस्यमत्प्रिये ॥ ये च मासाःससंक्रांतास्तेषांस्वामीरविःस्मृतः ॥ १ ॥ मलमासे
षुसर्वेषुस्वयंदेवोजनार्दनः ॥ तमुद्दिश्यकृतंयच्चस्वल्पंवायदिवाबहु ॥ २ ॥ हुतंदत्तंतपस्तप्तंतदक्षय्यकरंभवेत् ॥ संप्राप्तेमलमासेतुस्व
शक्त्यानकरोतियः ॥ ३ ॥ दानंहोमंव्रतंस्नानंतपोब्राह्मणभोजनम् ॥ तेनलिप्तेनदेहेनसयातिनरकंचिरम् ॥ ४ ॥ एकभक्तेननक्तेनतथैवाया
चितेनवा ॥ उपवासेनकुर्वीतमलमासव्रतंनरः ॥ ५ ॥ दानेवापिव्रतेवापियस्यशक्तिर्नविद्यते ॥ शरीरशोषणंतेनकर्त्तव्यंतीर्थसेवनम् ॥ ६ ॥
वचनाद्द्विजमुख्यानांसर्वव्रतफलंभवेत् ॥ सर्वव्यापीयथाविष्णुःसर्वभूतदयाकरः ॥ ७ ॥ मलिम्लुचेतथादानंलोकद्वयसुखावहम् ॥
॥ श्रीरुवाच ॥ ॥ निर्धनाश्चदुराचाराःपरभाग्योपजीविनः ॥ ८ ॥ नरानकिंचिज्जानंतिपशुवद्विचरंतिहि ॥ विवेकोनास्तियेषांवैकिंकार्यं
तैर्मलिम्लुचे ॥ ९ ॥ स्वामिन्हरेकृपालुस्त्वं करुणावरुणालय ॥ तत्सर्वंब्रूहिमेदेवयद्यहंतववल्लभा ॥ १० ॥ ॥ हरिरुवाच ॥ ॥ व्रते
दानेतथानक्तेयाचितेकायशोषणे ॥ सर्वथानास्तिसामर्थ्यंतैःकार्यंद्विजसेवनम् ॥ ११ ॥ साधूनांसेवनंकार्यंसर्वतीर्थफलप्रदम् ॥ कालेन
फलतेतीर्थंसद्योवैसाधुसेवनम् ॥ १२ ॥ साधूनांदर्शनंस्पर्शःकीर्त्तनंश्रवणंतथा ॥ कर्त्तव्यंशक्तिहीनैस्तुलोकांतरसुखप्रदम् ॥ १३ ॥ मलमासे
समायातेनरैःश्रेयोभिकांक्षिभिः ॥ तैरेवपूजनंकार्यंगवांविप्रस्यप्रत्यहम् ॥ १४ ॥ ॥ श्रीरुवाच ॥ ॥ भगवन्योगिनांश्रेष्ठसर्वधर्माःश्रुतामया॥
साधूनांश्रोतुमिच्छामिगवांपूजनमुत्तमम् ॥ १५ ॥ कथमेषापवित्रागौःकथंपूज्याचकिंफलम् ॥ तत्सर्वंब्रूहिमेदेवमलमासफलाप्तये ॥ १६ ॥
॥ विष्णुरुवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिप्रथमंपूजनंगवाम् ॥ गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश ॥ १७ ॥ गावःपवित्रमतुलंगावोमंगल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुच्यते ॥ गावोभूमिश्चभूतानिस्थावराणिचराणिच ॥ १८ ॥ नीराजयतियोंगानिगवांपुच्छेनभाग्यवान् ॥ अलक्ष्मीःकलहोरोगस्तदं
गाद्यांतिदूरतः ॥ १९ ॥ गोमयंयमुनासाक्षाद्गोमूत्रंनर्मदाशुभा ॥ क्षीरंगंगासमंयासांकिंपवित्रमतःपरम् ॥ २० ॥ गोभिर्विप्रै
श्चदेवैश्चसतीभिःसत्यवादिभिः ॥ अलुब्धैर्दानशीलैश्चसप्तभिर्धार्यतेमही ॥ २१ ॥ वेदाःशास्त्राणिधर्माश्चपुराणानीतिहासकम् ॥ आब्रह्मस्तंबप
र्यंतंगोषुतिष्ठंतिनित्यशः ॥२२॥ नान्यत्पश्यामिलोकेस्मिन्पावनंहिमलिम्लुचे ॥ विप्रागावश्चदानंचपरोपकरणंतथा ॥ २३ ॥ गावःपवित्राः
श्रेष्ठाश्चपावनाजगदुत्तमाः ॥ विनादुग्धघृताभ्यांचनेहयज्ञःप्रवर्तते ॥ २४ ॥ तेनयज्ञमशेषंहिगोमूलंसंप्रचक्षते ॥ गावोधिकास्तपस्विभ्यःसदा
सर्वेभ्यएवच ॥ २५ ॥ गोभिस्तुल्यंनपश्यामिधनंकिंचिदिहोच्यते ॥ कीर्तनंश्रवणंदानंदर्शनं चापिसुंदरि ॥ २६ ॥ स्पर्शनंपूजनंचैवमार्जनं
चप्रदक्षिणम् ॥ गवांप्रशस्यतेदेविसर्वपापहरंपरम् ॥ २७ ॥ ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतम् ॥ एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठति ॥
॥ २८ ॥ गावोलक्ष्म्याःसदामूलंगोषुमंत्रोनविद्यते ॥ स्वाहास्वधावषट्कारौगोषुनित्यंप्रतिष्ठितौ ॥ २९ ॥ अग्न्यागाराणिविप्राणांदेवतायत
नानिच ॥ पूज्यंतेशकृतायासांकिंपवित्रमतःपरम्॥३०॥ गावोयज्ञस्यनेत्रेवैगावोयज्ञस्यवैमुखम् ॥ अमृतंह्यक्षयंदिव्यंक्षीरंगावोवहंतिच॥३१॥
अमृतंचैवगोक्षीरमित्युवाचप्रजापतिः ॥ अमृतायतनंचैताःसर्वलोकनमस्कृताः ॥ ३२ ॥ योगंतुंवाञ्छतिस्वर्गंगोपूजांसकरोतिवै ॥ अधिमा
सेविशेषेणसुभक्त्यायवसादिना ॥ ३३ ॥ प्रदक्षिणीकृतागावोयेनमासेमलिम्लुचे ॥ प्रदक्षिणीकृतातेनसशैलासवनावनिः ॥ ३४ ॥ आदि
त्यदुहितागौर्हिपृथ्वीयंपरिकीर्तिता ॥ श्रेयोर्थेसर्वलोकानामुत्पन्नाक्रतुसिद्धये ॥ ३५ ॥ गोभ्योयज्ञाःप्रवर्त्ततेगोभ्योयज्ञाःसमुत्थिताः ॥ गोभ्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदाःसमुत्तीर्णाःसषडंगपदक्रमाः ॥ ३६ ॥ तृणानिखादंतिवसंत्यरण्येपिबंतितोयान्यपरिग्रहाणि ॥ दुह्यंतिवाह्यंतिपुनंतिविश्वंगवांरसैर्जीवति
जीवलोकः ॥ ३७ ॥ स्पृष्टाश्चगावःशमयंतिपापंदत्ताश्चगावस्त्रिदिवंनयंति ॥ संरक्षिताश्चोपनयंतिवित्तंगोभिर्नतुल्यंधनमस्तिकिंचित् ॥ ३८ ॥
सायत्रचाश्नातिददातिलक्ष्मींपापापहामित्रविवर्धनाच ॥ सएवनित्यंपरिभुज्यतेचगोभिर्नराणामिहसिद्धतंत्रः ॥ ३९ ॥ तृणानिशुष्काणिवनेच
रित्वापीत्वासुतोयान्यमृतंस्रवंति ॥ यद्गोमयाद्याश्चपुनंतिलोकान्गोभिर्नतुल्यंभुवनेषुदेवि ॥ ४० ॥ अनेनैवविधानेनपूजयित्वाप्रदापयेत् ॥
सुविप्रायसुशीलांगांमलमासेमलापहे ॥ ४१ ॥ पूजनंसंप्रवक्ष्यामिगवामघनिवारणम् ॥ दानंदेयंविशेषेणस्वर्गदंसुखदंनृणाम् ॥ ४२ ॥ इति
श्रीपद्मपुराणेप्रथमार्द्धेमलमासमाहात्म्येगोपूजनंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ श्रीकृष्णउवाच ॥ सुशीलांलक्षणवतींयुवतींवत्ससंयुताम् ॥
बहुदुग्धवतींस्निग्धांधेनुंदद्याद्विचक्षणः ॥ १ ॥ नकृशांमृतवत्सांवावंध्यांरोगान्वितांतथा ॥ नचव्यंगामतिश्रांतांगांदद्याद्ब्राह्मणायवै ॥ २ ॥
योदद्यान्नोपयुक्तार्थांजीर्णांधेनुंचनिष्फलाम् ॥ तमःसंप्रविशेद्दाताद्विजंक्लेशेनयोजयेत् ॥ ३ ॥ नैकशृंगांचलद्भृगांस्फुटिताक्षींचलत्खुराम् ॥ नद
द्यात्रिस्तनींचैवशुभ्रामेवचदापयेत् ॥ ४ ॥ होमार्थमग्निहोत्रस्ययोगांदद्याद्गुणान्विताम् ॥ सुरत्नपूर्णापृथिवीतेनदत्तानसंशयः ॥५ ॥ गौरेकस्यै
वदातव्याश्रोत्रियस्यविशेषतः ॥ साहितारयतेपूर्वान्सप्तसप्त त्रिसप्तच ॥ ६ ॥ सागौर्न्यायार्जितादत्ताकृत्स्नंसंतारयेत्कुलम् ॥ सुपात्रायार्थिने
पूज्यपूजितांदक्षिणान्विताम् ॥७॥ विधिवत्तुयदादत्तापात्रेधेनुःसदक्षिणा ॥ तदातारयतेजंतून्कुलानामयुतैःशतैः ॥ ८ ॥ अपात्रेसातुगौर्दत्तादा
तारंनरकंनयेत्॥कुलैकविंशतियुतंग्रहीतारंतुपातयेत्॥९॥नापात्रेविदुषादेयाह्यात्मनःशुभमिच्छता॥गीताधेनुर्हिरण्यंचपात्रेदत्तमनंतकम्॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एकाह्येकस्यदातव्याबहूनांनकदाचन ॥ साविक्रीताविभक्ताचदहत्यासप्तमंकुलम् ॥ ११ ॥ बहुक्षीरांचयोगांवैब्राह्मणायोपपादयेत् ॥
उत्तारयेत्सचात्मानंसप्तसप्तकुलानिच ॥ १२ ॥ आदौसंपूजयेद्धेनुंप्रार्थयेच्चततःपरम् ॥ संपूज्यविधिवद्भिप्रंततोदानंसदक्षि
णम् ॥ १३ ॥ मयाचब्राह्मणैःसार्द्धंशिवेनचमहर्षिभिः ॥ विचार्यगोगुणान्नित्यंप्रार्थनेयंकृतापुरा ॥ १४ ॥ कृत्वाप्रदक्षिणामादौगृहीत्वा
श्रीफलंशुभम् ॥ मुक्त्वापादौनमस्कृत्यततःपूजांसमारभेत् ॥ १५ ॥ अथप्रार्थनामंत्रः ॥ यालक्ष्मीःसर्वभूतेषुयाचदेवेव्यवस्थिता ॥ धेनुरू
पेणसादेवीममपापंव्यपोहतु ॥ १६ ॥ विष्णोर्वक्षसियालक्ष्मीःस्वाहाचैवविभावसोः ॥ स्वधायापितृमुख्यानांसाधेनुर्वरदास्तुमे ॥ १७ ॥
गावोमेह्यग्रतःसंतुगावोमेसंतुपृष्ठतः ॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहम् ॥ १८ ॥ पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ ॥ तासांमध्ये
तुयानंदातस्यैधेन्वैनमोनमः ॥ १९ ॥ याधेनुःकश्यपस्यस्यादत्रेर्वागौतमस्यच ॥ सास्तुकामफलादेवीइहलोकेपरत्रच ॥ २० ॥ याधेनुर्ज
मदग्नेश्चवसिष्ठस्यचयास्मृता ॥ विश्वामित्रस्ययाधेनुःसाधेनुर्वरदास्तुमे ॥२१॥ शृंगमूलेगवांनित्यंब्रह्मविष्णूसमाश्रितौ॥ शृंगाग्रेसर्वतीर्थानिस्था
वराणिचराणिच ॥ २२ ॥ शिरोमध्येमहादेवःसर्वभूतमयःस्थितः ॥ ललाटाग्रेस्थितादेवीनासावंशेचषण्मुखः ॥ २३ ॥ कंबलाश्वतरौनागौ
नासावंशेसमास्थितौ ॥ कर्णयोरश्विनौचैवचक्षुषोःशशिभास्करौ ॥ २४ ॥ दंतेषुवायवःसर्वेजिह्वायांवरुणःस्थितः ॥ सरस्वतीचहुंकारेयम
यक्षौचगंडयोः ॥ २५ ॥ संध्याद्वयंतथोष्ठाभ्यांग्रीवायामिन्द्रसंस्थितः ॥ रक्षांसिकुक्षिदेशेतुसाध्याश्चोरसिसंस्थिताः ॥ २६ ॥ चतुष्पात्सकलो
धर्मःस्वयंजंघासुसंस्थितः ॥ खुरमध्येतुगंधर्वाःखुराग्रेषुचपर्वताः ॥ २७ ॥ खुराणांपश्चिमेभागेगणाह्यप्सरसांस्थिताः ॥ रुद्राश्चैकादशपृष्ठेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवःसर्वसंधिषु ॥ २८ ॥ श्रोणीतटस्थाःपितरःसोमोलांगूलसंस्थितः ॥ आदित्यरश्मयोवालेपिंडीभूताव्यवस्थिताः ॥ २९ ॥ साक्षाद्गंगाच
गोमूत्रेगोमयेयमुनास्थिता ॥ क्षीरेसरस्वतीदेवीनर्मदादधिसंश्रिता ॥ ३० ॥ हुताशनःस्वयंसर्पिर्ब्राह्मणागुल्फसंस्थिताः ॥ त्रयस्त्रिंशत्तुदेवानां
कोट्योरोमसुसंस्थिताः ॥ ३१ ॥ उदरेपृथिवीदेवीसशैलवनकानना ॥ चत्वारःसागराःपूर्णागवांयेतुपयोधराः ॥ ३२ ॥ एभिर्मंत्रैस्तुविधिवत्पू
जयेत्परयाधिया ॥ हेमशृंगींरौप्यखुरींताम्रपृष्ठांसुशोभिताम् ॥ ३३ ॥ कांस्योपदोहनांकंठेघंटाद्यैरुपशोभिताम् ॥ रक्तवस्त्रेणसंवीतांमाल्यैः
कनकशोभिताम् ॥ ३४ ॥ ब्राह्मणंश्रुतिसंपन्नंकुलीनंधर्मवादिनम् ॥ पूजयेत्परयाभक्त्याशांतंदांतमलोलुपम् ॥ ३५ ॥ अंगुलीयकवस्त्राद्यैः
पूजयित्वाप्रदापयेत् ॥ ताम्रपात्रेघृतंकृत्वामध्येपुच्छंनिधायच ॥ ३६ ॥ सतिलंसकुशंवारिगृहीत्वादानमाचरेत् ॥ अनेनैवतुमंत्रेणपात्रहस्ते
जलंक्षिपेत् ॥ ३७ ॥ पात्रंवामनसिध्यात्वातोयमप्सुविनिक्षिपेत् ॥ उद्दिश्यवासुदेवंचप्रीयतामितिचाब्रवीत् ॥ ३८ ॥ अथदानमंत्रः ॥ यज्ञसा
धनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ ३९ ॥ जलशायीब्रह्मपितापद्मनाभःसनातनः ॥ अनंतभोग
शयनःप्रीयतांपरमःप्रभुः ॥ ४० ॥ दक्षिणांचततोदद्यात्सुवर्णशक्तिमात्रतः ॥ अनुव्रज्यततोधेनुंब्राह्मणेनसमन्वितः ॥ ४१ ॥ अनेनविधि
नाधेनुंयोविप्रायप्रयच्छति ॥ सर्वकामसमृद्धात्माविष्णुलोकेमहीयते ॥ ४२ ॥ सर्वेषामपिपापानांज्ञातानामविजानताम् ॥ प्रायश्चित्तमिदं
प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥ ४३ ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चान्यैश्चमानवैः ॥ लोकाःकामदुघाःप्राप्तागोदानादनघैश्चिरम् ॥ ४४ ॥
॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येगोदानमहिमकीर्तनंनामतृतीयोध्यायः ॥ ३ ॥ श्रीलक्ष्मीरुवाच ॥ यत्पुराभवताप्रोक्तंपूजनंब्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मणस्यच ॥ मलमासेप्रकर्त्तव्यंनरैःस्वर्गेप्सुभिःसदा ॥ १ ॥ कीदृशोब्राह्मणःप्रोक्तःकथंपूज्योमलिम्लुचे ॥ किंफलंलभतेमर्त्त्यःपूज
नाच्चद्विजन्मनः ॥ २ ॥ श्रीविष्णुरुवाच ॥ देवोमुनिर्द्विजोराजावश्यःशूद्रोबिडालकः ॥ पशुर्म्लेच्छोथचांडालोविप्रोदशविधःस्मृतः ॥ ३ ॥
श्रीरुवाच ॥ लक्षणंब्रूहिविप्राणांदेवादीनांसुरेश्वर ॥ कथंसंज्ञायतेनाथएतदेवोच्यतांमम ॥ ४ ॥ श्रीविष्णुरुवाच ॥ भिक्षाश्यध्यापकश्चैवसंतु
ष्टोविजितेंद्रियः ॥ वेदशास्त्रार्थतत्त्वज्ञोविप्रोदेवःप्रकीर्तितः ॥ ५ ॥ अकृष्टफलमूलाशीवनवासरतःसदा ॥ कुरुतेऽहरहःकर्मसविप्रऋषिरुच्यते
॥ ६ ॥ तपःसत्यमहिंसाचषट्कर्माणिदिनेदिने ॥ नभवेत्काललोपश्चसवैब्राह्मणउच्यते ॥ ७ ॥ अश्ववाहनतत्त्वज्ञःसंग्रामेनचभीःक्वचित् ॥
आरंभेनीतिमाञ्च्छूरःक्षत्रियोसौप्रकीर्तितः ॥ ८ ॥ लोहकर्मणिनिष्णातःपशूनांपरिपालकः ॥ कृषिवाणिज्यकर्त्ताचसविप्रोवैश्यउच्यते ॥ ९ ॥
स्नेहलाक्षातिलानीलीक्षारंक्षीरंघृतंमधु ॥ मद्यादिविक्रयीविप्रःसशूद्रःपरिकीर्तितः ॥ १० ॥ स्तेयप्रियोऽदयोलुब्धोदांभिकोलोकवंचकः ॥
हिंस्रकर्माभिकामश्चविप्रोमार्ज्जारउच्यते ॥ ११ ॥ भक्ष्याभक्ष्यसमोयस्तुसमोदारान्ययोरपि ॥ कृत्याकृत्यंनजानातिकृतघ्नोब्राह्मणःपशुः ॥ १२ ॥
वापीकूपतडागानांक्षेत्राणांचविनाशकः ॥ स्नानसंध्याविहीनश्चसविप्रोम्लेच्छउच्यते ॥ १३ ॥ क्रूरोलुब्धःप्रमादीचपरद्रव्यापहारकः ॥ निर्दयः
सर्वभूतेषुविप्रश्चांडालउच्यते ॥ १४ ॥ एवंविधंद्विजवरंमलमासेतुयोर्चयेत् ॥ चंदनाक्षतपुष्पैश्चधूपदीपोपहारकैः ॥ १५ ॥ नैवेद्यैर्विविधैर्भ

१ तपःसत्यगुणादिशीलम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्यैस्तांबूलादिविलेपनैः ॥ पूजयेत्प्रत्यहंविप्रंसर्वशास्त्रार्थपारगम् ॥ १६ ॥ इतिहासपुराणज्ञंविशेषेणतमर्चयेत् ॥ मत्परंमत्पराभिज्ञंशांतंदांत
मलोलुपम् ॥ १७ ॥ पुराणस्यचवक्तारंहरिरित्यभिधीयते ॥ तस्मैदत्तंद्विजाग्र्यायतदानंत्यायकल्पते ॥ १८ ॥ योवेदसततंभक्त्यापुराणानि
द्विजोत्तमः ॥ आत्मार्थंचपरार्थंचसहरिर्नात्रसंशयः ॥ १९ ॥ पुराणकथकोविप्रोव्यासरूपीहरिःस्वयम् ॥ तद्भक्तिंकुर्वतांनॄणांगंगास्नानंदिने
दिने ॥ २० ॥ पुराणधर्मकथनैर्यःसमुद्धरतेनरम् ॥ संसारसागरेमग्नंहरिरेवनसंशयः ॥ २१ ॥ मलमासेसमायातेयत्रक्वापिजलेमले ॥ स्नात्वा
व्यासंसमभ्यर्च्यपुरुषोत्तमबुद्धिना ॥ २२ ॥ एवंज्ञात्वानरैःसेव्यःपुराणज्ञोमलिम्लुचे ॥ प्रयागादधिकंपुण्यंतस्यविप्रस्यसेवनात् ॥२३॥ यत्रसं
कीर्त्यतेनित्यंमलमासकथानकम् ॥ तत्रतीर्थानिसर्वाणितुलस्यासहितोहरिः ॥ २४ ॥ यस्यभक्तिःपुराणज्ञंपात्रंदृष्ट्वात्वहर्निशम् ॥ सएवकृत
कृत्यश्चनपुनर्जायतेभुवि ॥ २५ ॥ नविद्ययाकेवलयातपसावापिपात्रता ॥ यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रचक्षते ॥ २६ ॥ प्रतिग्रहसमर्थोपि
नाऽदत्तेयःप्रतिग्रहम् ॥ येलोकादानशीलानांसतानाप्नोतिपुष्कलान् ॥ २७ ॥ किंचिद्वेदमयंपात्रंकिंचित्पात्रंतपोमयम् ॥ पात्राणामुत्तमंपात्रं
शूद्रान्नंयस्यनोदरे ॥ २८ ॥ विद्यातपोभ्यांहीनेननतुग्राह्यःप्रतिग्रहः ॥ गृह्णन्प्रदातारमधोनयत्यात्मानमेवच ॥ २९ ॥ असंतुष्टःसकृल्लोकान्ना
प्नोत्येवसुरेश्वरि ॥ अकिंचनोपिसंतुष्टःशेतेसर्वांगविज्वरः ॥ ३० ॥ विप्रानलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणःशांतान्नमस्ये
शिरसासकृत् ॥ ३१ ॥ किंस्वल्पतपसांनॄणामर्चयादेवरूपिणाम् ॥ दर्शनंस्पर्शनंप्रश्नंनमस्कारार्चनादिकम् ॥ ३२ ॥ तपस्यादीनितीर्थानि

१ सत्यतपसी ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूदेवमलमासयोः ॥ पुनातितीर्थकालेनदर्शनादेवसाधवः ॥ ३३ ॥ नवह्निर्नचमार्तंडोनचंद्रोनचतारकाः ॥ नभूर्मिर्नानलोनोखंनवायुर्नचवा
ङ्मनः ॥ ३४ ॥ उपासतांभेदवतांपुंसोघस्मरनाशनः ॥ पुनंतीहपुनर्विप्राःसाधवःक्षणसेवया ॥ ३५ ॥ यस्यबुद्धिस्त्रिदोषादिदूषितेचकलेवरे ॥
कालादिषुचभौमेषुविकारेषुचपुण्यधीः ॥ ३६ ॥ तीर्थबुद्धिर्जलेनोज्ञेजनेक्वचिदसौखरः ॥ लोकानुग्रहकर्तारोविप्राभुविचरंतिहि ॥ ३७ ॥
पुनानाःपादरजसाहृदयस्थितकेशवाः ॥ शनैःपुनंतिकालेनदर्शनस्पर्शनाच्चवै ॥ ३८ ॥ शनैःपुनंतिकालेनदर्शनादेवसाधवः ॥ कृतस्वस्त्ययन
नोविप्रैःसोहंजातोजनार्दनः ॥ ३९ ॥ ब्राह्मणोजन्मनाश्रेयान्सर्वेषांप्रणिनामिह ॥ तपसाविद्ययायुक्तःकिमुसद्भक्तिसंयुतः ॥ ४० ॥ नब्राह्मणा
न्मेदयितंरूपमन्यच्चतुर्भुजम् ॥ सर्वदेवमयोविप्रःसर्ववेदमयोह्यहम् ॥ ४१ ॥ दुष्प्रज्ञाअविदित्वैवमवजानंत्यसूरयः ॥ गुरुंमांविप्रमात्मानम
र्चादौभेदबुद्धयः ॥ ४२ ॥ चराचरमिदंविश्वंभावयत्यात्महेतवे ॥ मद्रूपाणीतिमनसिधत्तेविप्रोमदीक्षया ॥ ४३ ॥ तस्माद्ब्रह्मर्षयःपूज्यानित्य
शुद्धधियाबुधैः ॥ एवंदेव्यर्चितेविप्रेपूजितंभुवनत्रयम् ॥ ४४ ॥ दुर्जरंबतब्रह्मस्वंभुक्तमग्रेमनागपि ॥ नजीर्यतेपिकिमुतराज्ञामीश्वरमानिनाम् ॥
॥४५॥ नाहंहालाहलंमन्येविषंयस्यप्रतिक्रिया ॥ ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिविधिक्रिया ॥४६॥ हिनस्तिविषमत्तारंवह्निरद्भिःप्रशाम्यति ॥
कुलंसमूलंदहतेब्रह्मस्वारणिपावकः ॥ ४७ ॥ ब्रह्मस्वंपुनरज्ञातंभुक्तंहंतित्रिपूरुषम् ॥ प्रसह्यतुबलाद्भुक्तंदशपूर्वान्दशापरान् ॥ ४८ ॥ राजानः
संपदामत्तानात्मपापंविचक्षते ॥ निरयेयेभिमन्यंतेब्राह्म्यंगृह्णंतिबालिशाः ॥ ४९ ॥ गृह्णंतियावतःपांसूंस्तावतामश्रुबिंदवः ॥ विप्राणांगतवृत्ती
नांवदान्यानांकुटुंबिनाम् ॥ ५० ॥ राजानोराजभृत्याश्चतावतोब्दान्निरंकुशाः ॥ कुंभीपाकेषुपच्यंतेब्रह्मदायापहारकाः ॥ ५१ ॥ स्वदत्तांपरद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तांवाब्रह्मवृत्तिंहरेत्तुयः ॥ षष्टिवर्षसहस्राणिविष्ठायांजायतेक्रिमिः ॥ ५२ ॥ नमेब्रह्मधनंभूयोयल्लब्ध्वाल्पायुषोनृपाः ॥ पराजिताश्च्युताराज्या
द्भवंत्युद्वेजिनोहये ॥ ५३ ॥ विप्रकृतागसमपिनैवद्रुह्यतमामकाः ॥ घ्नंतंबहुशपंतंवानमस्कुरुतमामकाः ॥ ५४ ॥ यथाहंनौमिविप्रेंद्रमनुकालं
समाहितः ॥ तथानमतयूयंचयोन्यथामेसदंडभाक् ॥५५॥ ब्राह्मणार्थोह्यपहृतोहर्तारंपातयत्यधः ॥ अजानंतमपिह्येनंनृगंब्राह्मणगौरिव॥५६॥
इति श्रीपद्मपुराणेमलमासमाहात्म्येचतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ एकदोपवनंदेविजग्मुर्यदुकुमारकाः ॥ विहर्तुसां
बप्रद्युम्नचारुभानुगदादयः ॥ १ ॥ क्रीडित्वासुचिरंकालंविचरंतःपिपासिताः ॥ जलेनिरुदकेकूपेददृशुःसत्त्वमद्भुतम् ॥ २ ॥ कृकलासंगिरिनि
भंवीक्ष्यविस्मितमानसाः ॥ तस्यचोद्धरणेयत्नंचक्रुस्तेकृपयान्विताः ॥ ३ ॥ चर्मजैस्तांतवैःपाशैर्बद्धापतितमर्भकाः ॥ नाशक्नुवन्समुद्धर्तुंकृ
ष्णंचाचख्युरुत्सुकाः ॥ ४ ॥ तत्रागत्यारविंदाक्षोभगवान्विश्वभावनः ॥ वीक्ष्योज्जहारवामेनतंकरेणसलीलया ॥ ५ ॥ सउत्तमश्लोककराभि
मृष्टोविहायसद्यःकृकलासरूपम् ॥ प्रतप्तचामीकरचारुवर्णस्वर्ग्यद्भुतालंकरणांबरःस्रक् ॥ ६ ॥ पप्रच्छविद्वानपितान्विदानमिमांदशांत्वंकतमेन
कर्मणा ॥ संप्रापितोह्यतदर्हामभद्रामात्मानमाख्याहिविदित्सितान्नः ॥ ७ ॥ इतिस्मराजासंपृष्टःकृष्णेनानंतमूर्तिना ॥ नृगोवैप्राणिपत्याहकि
रीटेनार्कवर्चसा ॥ ८ ॥ नृगउवाच ॥ नृगोनामनरेंद्रोहमिक्ष्वाकुतनयःप्रभो ॥ दानिष्वाख्यायमानेषुयदितेकर्णमस्पृशम् ॥ ९ ॥ किंतुतेविदि
तंनाथसर्वभूतात्मसाक्षिणे ॥ कालेष्वव्याहतदृशोवक्ष्येथापितवाज्ञया ॥ १० ॥ यावंत्यःसिकताभूमौयावंत्योदिवितारकाः ॥ यावंत्योवर्षधारा
श्चतावतीरददंस्मगाः ॥ ११ ॥ पयस्विनीस्तरुणीःशीलरूपागुणोपपन्नाःकपिलाहेमशृंग्यः ॥ न्यायार्जितारौप्यखुराःसवत्सादुकूलमालाभरणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ददावहम्॥१२॥ स्वलंकृतेभ्योगुणशीलवद्भ्यःसीदत्कुटंबप्रधृतव्रतेभ्यः॥तपोभृतोब्रह्मविदांवरिष्ठास्तेभ्यःप्रादांह्यनिशंभक्तियुक्तः ॥१३॥ गौर्भूर्हि
रण्यायतनानिहस्तिनःकन्याश्चदासीतिलरौप्यशय्याः ॥ वासांसिरक्तानिपरिच्छदानिरथाश्वयज्ञैश्चरितैश्चपूर्तैः ॥१४॥ कस्यचिद्द्विजमुख्यस्य
भ्रष्टागौर्ममगोधने ।। संपृक्ताऽविदुषासाचमयादत्ताद्विजातये ॥१५॥ तांनीयमानांतत्स्वामीदृष्ट्वावचनमब्रवीत् ॥ ममेतिप्रतिग्राहीवैनृगोमेदत्तवा
निति ॥ १६ ॥ विप्रौविवदमानौतावूचतुःस्वार्थकामुकौ ॥ भवान्दातापहर्तावैतच्छ्रुत्वामेभवद्भ्रमः ॥ १७ ॥ अनुनीताउभौविप्रौधर्म
कृच्छ्रगतेनवै ॥ गवांलक्षप्रकृष्टानांदास्याम्येषाप्रदीयताम् ॥ १८ ॥ भवंतोह्यनुगृह्णीतकिंकरस्याविजानतः ॥ समुद्धरतमांकृच्छ्रात्पतंतंनिरयेऽ
शुचौ ॥ १९ ॥ नाहंप्रतीच्छेवैराजन्नित्युक्त्वागतवांस्तदा ॥ नान्यद्गवामप्ययुतमिच्छामीत्यपरोययौ ॥ २० ॥ एतस्मिन्नंतरेयाम्यैर्दूतैर्नीतोय
मक्षयम्[1] ॥ यमेनपृष्टस्तत्राहंदेवदेवजगत्पते ॥ २१ ॥ ॥ यमउवाच ॥ ॥ पूर्वंत्वमशुभंभुंक्ष्वउताहोनृपतेऽशुभम् ॥ नांतंदानस्यधर्मस्ययस्य
लोकस्यभास्वतः ॥ २२ ॥ मयोक्तंपूर्वमशुभंभोक्ष्येप्राहपतेतिसः ॥ तावद्द्राक्षमात्मानंकृकलासंपतन्प्रभो ॥ २३ ॥ ब्रह्मण्यस्यवदान्यस्यतव
दासस्यकेशव ॥ स्मृतिर्नाद्यापिविध्वस्ताभवत्संदर्शनार्थिनः ॥ २४ ॥ सत्वंकथंममविभोऽक्षिपथःपरात्मायोगेश्वरैःश्रुतिदृशामलदृग्विभाव्यः॥
साक्षाद्धृषीकेशजउरुव्यसनांबुधेस्मत्संदर्शनांत्विहनयस्यभवापवर्गः ॥ २५ ॥ देवदेवजगन्नाथगोविंदपुरुषोत्तम ॥ नारायणहृषीकेशपुण्यश्लोका
च्युताव्यय ॥ २६ ॥ अनुजानीहिमांकृष्णयामिदेवगतिंविभो ॥ यत्रक्वापीहमच्चेतोभूयान्मेत्वत्पदास्पदम् ॥ २७ ॥ इत्युक्त्वातंपरिक्रम्यपादौ

---

१ स्थानम् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पृष्ट्वास्वमौलिना ॥ अनुज्ञातोविमानाग्र्यमारोहत्पश्यतांनृणाम् ॥ २८ ॥ कृष्णःपरिजनंगृह्यंभगवान्देवकीसुतः ॥ ब्रह्मण्यदेवोधर्मात्माराजान
मनुशिक्षयन्॥२९॥श्रीविष्णुरुवाच॥एवंविभाव्यभगवान्मुकुंदोद्वारकौकसः॥पावनःसर्वलोकानांविवेशनिजमंदिरम् ॥३०॥सद्भिःसमागमोराज
न्कदाचिन्नाफलोभवेत् ॥ विमुक्तोनरकाद्राजानृगःसाधुसमागमात् ॥ ३१ ॥ साधूनांदर्शनंस्पर्शःकीर्तनंस्मरणंतथा ॥ तीर्थानामिवपुण्यानांत
त्सर्वंपावनंस्मृतम् ॥ ३२ ॥ एतच्छ्रुत्वात्वयाभद्रेसद्योयास्याःपरंतथा ॥ ब्रह्मस्वंनचहर्तव्यंयदीच्छसिपरांगतिम् ॥ ३३ ॥ इतिश्रीपद्मपुराणे
मल० मा० पंचमोऽध्यायः ॥ ५ ॥ छ ॥ श्रीरुवाच ॥ भगवन्मलमासेवैदीपदानस्ययत्फलम् ॥ तत्सर्वंब्रूहिमेदेवलोकानांहितकाम्यया ॥१॥
कृतेदीपफलंकीदृग्रक्षणेकिंफलंलभेत् ॥ केनैवविहितंपूर्वंकोमुक्तोयोनिसंकटात् ॥ २ ॥ केनद्रव्येणकर्तव्यःकियंतंकालमेवच ॥ कतिभिस्तंतु
भिर्देवदिनानिकतिसंख्यया ॥३॥ श्रीविष्णुरुवाच ॥ शृणुदेविप्रवक्ष्यामिरहस्यंपापनाशनम् ॥ यत्कृत्वापितृहागोघ्नोब्रह्महागुरुतल्पगः ॥४॥
विघातीकूटसाक्षीवासर्वपापकरोपिवा ॥ मुच्यतेनात्रसंदेहोविष्णुलोकंसगच्छति ॥ ५ ॥ कृतेनयेनशुद्धात्मामुक्तिमाप्नोतिशाश्वतीम् ॥ शतंकु
लानामुद्धृत्यवसतेसहभास्करैः ॥ ६ ॥ तदहंसंप्रवक्ष्यामिदीपदानंमलिम्लुचे ॥ मासमात्रंप्रकर्तव्योदीपःपापप्रणाशनः ॥ ७ ॥ घृतेनदीपयेद्दी
पंतिलतैलेनवासितम् ॥ अखंडंदीपकंकुर्यात्सप्तभिस्तत्रतंतुभिः ॥८॥ प्रतिप्रदिनमारभ्ययावद्दर्शदिनंभवेत् ॥ असंक्रांतौसमायातेमासेवैपुरुषो
त्तमे॥९॥उषस्युत्थायमुदितःकामक्रोधविवर्जितः ॥ संगमेषुचनद्यांवानिर्झरेषुह्रदेषुवा ॥१०॥ वापीकूपतडागेषुगृहेवाशीतवारिणा ॥ उष्णोदके
नवाकार्यंस्नानंशुद्धिपरैर्नरैः॥११॥संपूर्णफलदंसम्यक्स्नानमुष्णेनवारिणा॥शीतेद्विगुणमेवस्यात्कूपेतच्चचतुर्गुणम् ॥१२॥वाप्यामष्टगुणंप्रोक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तडागेदशधास्मृतम्।ततोदशगुणंप्रोक्तंह्रदेचनिर्झरेदश॥१३॥नद्यांदशगुणंप्रोक्तंमहानद्यांततोदश॥ सहस्रगुणितंप्रोक्तंमहानद्योश्चसंगमे॥१४॥
मंत्रेणानेनकर्तव्यंस्नानंशुक्लतिलैःसह ॥ धातकीफलचूर्णेनगोमूत्रसाहितेनच ॥ १५ ॥ अथस्नानमंत्रः ॥ देवदेवहृषीकेशसुरासुरनमस्कृत ॥
पापक्षयायमासेऽस्मिन्स्नानार्थमहमुद्यतः ॥ १६ ॥ संपादयत्वविघ्नेनपुरुषोत्तमतेनमः ॥ पुष्कराद्यानितीर्थानिस्मरेत्स्नानोद्यतःसदा ॥१७॥
मालिनीनलिनीसीतानंदिनीचमलापगा ॥ विष्णुपादाग्रसंभूतागंगात्रिपथगामिनी ॥ १८ ॥ भागीरथीहैमवतीजाह्नवीत्रिदशेश्वरी ॥ द्वादशैता
निनामानियत्रयत्रजलाशये ॥ १९ ॥ स्नानोद्यतास्तरिष्यंतितत्रतत्रमदाज्ञया ॥ स्नातोहंसर्वतीर्थेषुसर्वप्रस्रवणेषुच ॥ २० ॥ नदीषुदेवखातेषु
स्नानंभवतुमेसदा ॥ एवंस्नात्वातथाऽऽचम्यपरिधायचवाससी ॥ २१ ॥ यत्पुरानरनारीभिस्त्रिवर्णैर्यदघंकृतम् ॥ मलमासेसमायातेकंपते
श्वत्थपर्णवत् ॥ २२ ॥ सप्तजन्मार्जितंपापंस्नानेनैकेनगच्छति ॥ दशजन्मार्जितंपापंपर्वणिस्नानतोव्रजेत् ॥ २३ ॥ शतजन्मोत्थितंपापंमा
सार्धेनैवगच्छति ॥ जन्मांतरसहस्रैस्तुयदघंसमुपार्जितम् ॥ २४ ॥ विधिनास्नानमात्रेणमासेनविलयंव्रजेत् ॥ येनकुर्वंतिसुभगेसेचनंचमलि
म्लुचे ॥ २५ ॥ दुःखदारिद्र्यपंकौघान्निःसरंतिनतेक्वचित् ॥ तस्मात्सर्वात्मनादेविस्नातव्यंमलमासके ॥ २६ ॥ मलापकर्षकोमासोमलमास
स्ततोबुधैः ॥ निर्धारितोवशिष्ठाद्यैःपुराणैर्वेदचिंतकैः ॥ २७ ॥ मलंतुपातकंनामस्नानदानादिदीपकैः ॥ क्रियतेभस्मसात्सर्वंपुरुषोत्तमपूजकैः
॥ २८ ॥ सर्वेषांपुण्यमासानामयमेवाधिकोमतः ॥ स्नानदानादिकंपुण्यमक्षय्यंमत्प्रसादतः ॥ २९ ॥ अस्मिन्मासेप्रकर्तव्यमनंतफलमीप्सु

१ आवळकाठी । २ डोंगरीझरे । ३ प्राचीनतळें ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिः ॥ किंबहूक्तेनकमलेकमलाकांक्षिभिर्नरः ॥ ३० ॥ ततःपौर्वाह्णिकंसर्वंसमाप्यपुरुषोत्तमम् ॥ मत्स्यादिनामभिर्गंधपुष्पधूपादिनार्चयेत् ॥
॥ ३१ ॥ ततस्तुस्थापयेत्कुंभमव्रणंतोयपूरितम् ॥ तदग्रेस्थापयेद्दीपंताम्रपात्रेसुसंस्कृते ॥ ३२ ॥ घृतेनदीपयेद्दीपंतिलतैलेनवापुनः ॥ सप्त
भिस्तंतुभिश्चैवपंचांगुलप्रमाणतः ॥ ३३ ॥ प्रतिष्ठाप्यततोदीपंपूजयेद्विधिनाततः ॥ कुंभेचपूजयेद्देवंततःसंकल्पमाचरेत् ॥ ३४ ॥ दीपस्तमो
नाशयतिदीपःकांतिंप्रयच्छति ॥ तस्माद्दीपप्रदानेनप्रीयतांपुरुषोत्तमः ॥ ३५ ॥ अविद्यातमसाव्याप्तेसंसारेपापगर्भिते ॥ ज्ञानमोक्षप्रदोदीप
स्तस्माद्दत्तोमयातव ॥ ३६ ॥ गृहाणेमंमयादत्तंसुदीपंपुरुषोत्तम ॥ प्रसादसुमुखोभूत्वावांछितार्थप्रदोभव ॥ ३७ ॥ प्रतिष्ठाप्यततःकुंभंपूज
येच्चंदनादिना ॥ मनसाहर्षयुक्तेनबहुमंगलसंयुतः ॥३८॥ कस्तूरीकुंकुमोपेतंकर्पूरागुरुसंयुतम् ॥ गृहाणदेवदेवेशचंदनंरोचनान्वितम् ॥३९॥
कालोद्भवानिपुष्पाणिसुगंधीनिबहूनिच ॥ पद्मानिश्वेतरक्तानिगृहीत्वासुमुखोभव ॥ ४० ॥ कृष्णागुरुयुतंधूपंगुग्गुलैर्मधुराऽन्वितम् ॥ गृहाण
परयाभक्त्यामयादत्तंसुरेश्वर ॥ ४१ ॥ कुर्यादारार्तिकंदीपंपूजयेद्दिक्पतींस्तथा ॥ गृहाणदेवदेवेशदत्तमारार्तिकंमया ॥ ४२ ॥ फलानिस्वादवं
तीहऋतुकालोद्भवानिच ॥ मयादत्तानिदेवेशफलैःसुफलदोभव ॥ ४३ ॥ नानाविधानिचान्नानिघृतपक्वानियानिच ॥ लेह्यंपेयंतथाचोष्यंभ
क्ष्यंबहुगुणान्वितम् ॥ ४४ ॥ सुभोज्यंषड्रसोपेतंगृहाणान्नंसुसंस्कृतम् ॥ मयादत्तंसुरश्रेष्ठसुतृप्तोवाञ्छितंकुरु ॥ ४५ ॥ एलाकर्पूरकंकोललवं
गाद्यैःसुसंस्कृतम् ॥ तांबूलंमुखवासार्थंत्वंगृहाणसुरेश्वर ॥ ४६ ॥ आरार्तिकंततःकुर्यात्प्रादक्षिण्याभिवादनम् ॥ शक्त्याकिंचित्प्रदातव्यं
नित्यमेवसमाचरेत् ॥ ४७ ॥ भोजयेद्ब्राह्मणाञ्छक्त्याभक्त्यादद्याच्चदक्षिणाम् ॥ रात्रौजागरणंकुर्यान्मासांतेप्रीतिपूर्वकम् ॥ ४८ ॥ अनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिनायेवैदीपंकुर्वंतिमानवाः ॥ तेयांतिपरमंस्थानंपुनरावृत्तिवर्जितम् ॥ ४९ ॥ गोभूहिरण्यदानानांयत्फलंलभतेनरः ॥ तत्फलंसमवाप्नो
तिदीपदोनात्रसंशयः ॥ ५० ॥ दीपदःकांतिमाप्नोतिदीपदोधनमुत्तमम् ॥ दीपदोज्ञानमाप्नोतिदीपदोमोक्षमव्ययम् ॥ ५१ ॥ दीपदाताच
सौभाग्यंविद्यामत्यंतनिर्मलाम् ॥ आरोग्यंपरमामृद्धिंलभतेनात्रसंशयः ॥ ५२ ॥ दीपदश्चशुभांभार्यांसर्वलक्षणसंयुताम् ॥ पुत्रपौत्रान्प्रपौत्रां
श्चसंततिश्चाक्षयाभवेत् ॥ ५३ ॥ ब्राह्मणःपरमंज्ञानंक्षत्रियोराज्यमुत्तमम् ॥ वैश्योधनपशून्सर्वाञ्छूद्रःसुखमवाप्नुयात् ॥ ५४ ॥ कुमारीचा
पिभर्तारंसर्वलक्षणसंयुतम् ॥ प्राप्नोतिपरमायुश्चपुत्रपौत्रसमन्विता ॥ ५५ ॥ वैधव्यंनैवयुवतिःकदाचिदपिपश्यति ॥ नवियोगमवाप्नोतिदीपदा
नप्रभावतः ॥ ५६ ॥ आधयोव्याधयश्चैवदीपदानात्प्रणाशिताः ॥ भीतोभयात्प्रमुच्येतबद्धोमुच्येतबंधनात् ॥ ५७ ॥ ब्रह्महत्यादिभिःपापै
र्दीपदानप्रभावतः ॥ मुच्यतेनात्रसंदेहोब्रह्मणोवचनंतथा ॥ ५८ ॥ चांद्रायणानिकृच्छ्राणिचरितानिनसंशयः ॥ येनास्मिन्नधिकेमासिदत्तो
दीपःसुलोचने ॥ ५९ ॥ दीपंप्रज्वलितंदृष्ट्वायेनंदंतिनरोत्तमाः ॥ तेयांतिपरमंस्थानंयत्सुरैरपिदुर्लभम् ॥ ६० ॥ दीपस्यज्वलनेबुद्धिंयोददाति
मलिम्लुचे ॥ सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति ॥ ६१ ॥ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ यस्यस्मरणमात्रेणसर्वपापैःप्रमुच्यते
॥ ६२ ॥ पुरासरस्वतीतीरेसुशर्मानामवैद्विजः ॥ भिक्षाचाररतोनित्यंकुटुंबपरिपालकः ॥ ६३ ॥ विष्णुंसंपूज्यविधिवद्दीपंसंपादयन्सदा ॥
एवंप्रवर्तमानस्यमद्भक्तस्यसुशर्मणः ॥ ६४ ॥ कदाचित्तस्यभवनेपूजांकृत्वामलिम्लुचे ॥ हृदिसंस्मृत्यदेवेशंरात्रौचस्थिरताऽभवत् ॥ ६५ ॥
समागच्छतिमार्जारोमूषकार्थंमहर्निशम् ॥ एकादशीदिनेप्राप्तेमलमासस्यशोभने ॥ ६६ ॥ पुरुषोत्तममभ्यर्च्यरात्रौजागरणेस्थितः ॥ अर्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रेसमायातोमार्जारोमूषकाशनः ॥ ६७ ॥ मंदतेजसिदीपेतुमूषकार्थंसमुद्यतः ॥ तस्यपादप्रहारेणदीपःसंवर्धितोनिशि ॥ ६८ ॥ प्रातर्ममार
मार्जारःकेनचित्कारणेनवै ॥ विमानवरमारूढोगतोहरिपुरंप्रति ॥ ६९ ॥ दीपप्रभावाद्दीप्तोसौजातोभुविसमृद्धिमान् ॥ पुत्रपौत्रैःपरिवृतोधन
धान्यसमृद्धिमान् ॥ ७० ॥ आरोग्यंपरमामृद्धिमवापमहतींश्रियम् ॥ मलमासप्रदीपाच्चसुशर्मामोक्षमागतः ॥ ७१ ॥ इति श्रीपद्मपुराणेमल
मासमाहात्म्येदीपमहिमवर्णनंनामषष्ठोऽध्यायः ॥ ६ ॥ श्रीरुवाच ॥ देवेश्वररमानाथपुनर्दीपफलंवद ॥ यथायेनकृतोदीपोविध्वस्तेकिंच
पातकम् ॥ १ ॥ श्रीकृष्णउवाच ॥ पुनरन्यत्प्रवक्ष्यामिदीपस्यफलमुत्तमम् ॥ दीपविध्वंसनेपुण्यंसर्वंनश्यतियत्कृतम् ॥ २ ॥ पुरामधुवने
विप्रोह्यासन्नाम्नाचशाकलिः ॥ सदाचारवतस्तस्यगृहेभार्याद्वयंशुभम् ॥ ३ ॥ विमलैकासुशीलान्यापातिव्रत्यपरायणा ॥ शुभाचाररतेचोभे
पतिप्रियहितेरते ॥ ४ ॥ तस्यैवंवर्तमानस्यधार्मिकस्यद्विजन्मनः ॥ मलमासःसमायातःपुरुषोत्तमवल्लभः ॥ ५ ॥ एकदानिर्गतागेहात्सुशी
लाशीलसंयुता ॥ प्रातरेकागतासातुजलार्थंयमुनानदीम् ॥ ६ ॥ स्नानार्थमुद्यतंलोकंदृष्ट्वाप्रोवाचसापतिम् ॥ साध्वीमधुरयावाचाविनयानत
कंधरा ॥ ७ ॥ सुशीलोवाच ॥ भगवन्प्रष्टुमिच्छामिक्रोधंकर्तुंनचार्हसि ॥ अद्यकिंदिवसंपुण्यंलोकोयातिरवेःसुताम् ॥ ८ ॥ शाकलिरुवाच॥
शृणुभद्रेप्रवक्ष्यामियदर्थंयांतिनागराः ॥ असंक्रांतःसमायातोमासःश्रीपतिवल्लभः ॥ ९ ॥ मलिम्लुचइतिख्यातोह्यक्षय्यःपुण्यसंपदाम् ॥ प्रबो
धयंतियेदीपंविष्णुलोकंवसंतिते ॥ १० ॥ दीपप्रदोमलेमासेनपुनर्जायतेभुवि ॥ तस्माद्भद्रेप्रकर्तव्यंस्नानंभक्तिमभीप्सुभिः ॥ ११ ॥ कर्तव्यो
दीपकोखंडोयावत्त्रिंशद्दिनावधि ॥ फलंतस्यनशक्नोतिवक्तुंदेवश्चतुर्मुखः ॥ १२ ॥ सुशीलोवाच ॥ ममापिमानसोत्साहःकर्तुंदेवतवाज्ञया ॥ भर्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राज्ञाकृतंकर्मसफलंभुविजायते॥ १३॥शाकलिरुवाच ॥ कुरुदेविप्रसन्नोहंस्नानंदीपंचयत्नतः ॥ नत्वत्समापरानारीपातिप्रियहितेरता ॥१४॥ भर्तु
राज्ञामुपादायप्रसन्नेनांतरात्मना ॥ स्नानंतरंणिजातोयेकृतंदीपःप्रबोधितः ॥१५॥ संपूज्यदीपकंनित्यंभर्तारंप्रतिपूज्यच ॥ भर्तुःशेषमनुज्ञातंहवि
र्मत्वाचभुंजति॥ १६॥एवंतयासुव्रतिन्यात्रतमारब्धमुत्तमम् ॥ विमलाविमनाजातागृहकार्यंकरोतिन॥ १७॥सपत्नीद्वेषमापन्नातनयाभिपरिप्लुता ॥
किंकृत्वासुसुखंमेस्याद्धतेविघ्नःकथंभवेत् ॥१८॥ दीपमाशुप्रशमयेतैलंदीपाद्धराम्यहम् ॥ निर्धारितंतयैवेत्थंमनसाक्षुब्धमिच्छया ॥ १९ ॥ एकै
ववसतीगेहेविमलापाककारिणी ॥ गृहद्वारंपिधायैवंशमयामासदीपकम् ॥ २० ॥ तैलंदीपादपहृतंपुनर्द्वारिसमागता ॥ सुशीला गृहमागत्य
दीपंचालोक्यदुःखिता ॥ २१ ॥ ततोद्वितीयेदिवसेसुशीलानिर्गतागृहात् ॥ सोपिविप्रोबहिर्यातोगृहकार्यार्थमेवहि ॥ २२ ॥ पुनःसंबोधयामा
सदीपकंदुःखिताभृशम् ॥ एवंदेवंहृदिध्यात्वागृहकर्मरताऽभवत् ॥ २३ ॥ विलोक्यावसरंदुष्टाफूत्कारेणप्रशाम्यति ॥ एवंतयाचसर्पिण्यादी
पध्वंसोह्यहर्निशम् ॥२४॥ लुप्तोदीपोहृतंतैलंमहाविघ्नःकृतस्तया ॥ साध्व्यासुशीलयाज्ञातंनचोक्तंच शुभाशुभम् ॥२५॥ भर्तुर्देवप्रसादाभ्यांपा
लितंव्रतमुत्तमम् ॥ संभोज्यब्राह्मणान्भक्त्याशक्त्यादत्त्वाचदक्षिणाम् ॥२६॥ दीपनिर्णाशनात्सद्योविमलादुःखिताभवत् ॥ तस्याःपुत्रत्रयंनष्ट
मंधत्वंसमुपागता ॥ २७ ॥ अदीर्घेनैवकालेननिधनंसमुपागता ॥ त्रिंशद्वर्षसहस्राणिरौरवेनरकेस्थिता ॥ २८ ॥ तत्पापयोगेनपुनर्जाता
साग्रामसूकरी ॥ पुनर्जातावनेव्याली[2]शृंगाली[3]वल्गुलीपुनः ॥ २९ ॥ गृहगोधा[4]पुनर्जातानिषादीमद्रमंडले ॥ मंडलाकारकुष्ठेनजातासागलिते

१ यमुना । २ कोल्ही । ३ वनवाघुळ । ४ पाली ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवै ॥ ३० ॥ एवंतथाविमलयादीपप्रशमनात्फलम् ॥ प्राप्तंदुखंवियोगेनसुशीलासद्गतिंगता ॥ ३१ ॥ संस्थाप्यसंततिंभूमौवैकुंठनिलयंग
ता ॥ सायुज्यंपतिसंयुक्तापुनरावृत्तिदुर्लभम् ॥ ३२ ॥ नारीवापिनरोवापियःकरोतिमलिम्लुचे ॥ स्नानंवादीपकंवापिविप्रसेवनमेवच॥३३॥
नतस्य जायतेजन्मनपुनर्गर्भवेदनाः ॥ यःपठेच्छृणुयाद्वापिसोपितत्फलभाग्भवेत् ॥ ३४ ॥ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येदीप
महिमवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥ ॥ श्रीरुवाच ॥ ॥ भगवन्भवतापौघहारिन्नानंदविग्रह ॥ मलमासेत्वशक्तानांस्नानादौकिं
शुभंनृणाम् ॥ १ ॥ कृतेनकेनतेमुक्ताभवंतिवदसांप्रतम् ॥ मलमासकृतंप्रातःस्नानादौसकलंफलम् ॥ २ ॥ लभंतेचनरानार्यस्तत्किंशोभनमु
त्तमम् ॥ रहस्यंकर्मकृपयावदविश्वार्तिहारक ॥ ३ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुसाध्विप्रवक्ष्यामिलोकानुग्रहकारिणि ॥ सम्यक्प्रश्नः
कृतःसर्वलोकोपकृतिकारकः ॥ ४ ॥ नराणांचैवनारीणांसर्वेषामात्मनःप्रिये ॥ सर्वदासर्वदानोत्थफलदंसर्वकामिकम् ॥ ५ ॥ यज्ञादिफलदं
सर्वंकथयामिसनातनम् ॥ रहस्यंकर्मराजाख्यंनैष्कर्म्यफलदायकम् ॥ ६ ॥ अपिकर्मफलौघानांदाहकंभवतारकम् ॥ अशक्तानांविशेषेणमल
मासेविशेषतः ॥ ७ ॥ हरेर्नामहरेर्नामकीर्तनंकथितंबुधैः ॥ येनकेनप्रकारेणसर्वकामाप्तिसाधनम् ॥ ८ ॥ कृष्णकृष्णेतिकृष्णेतिस्वपञ्जाग्रंस्त
थानिशि ॥ जपन्नितिकलौनित्यंकृष्णरूपीभवेन्नरः ॥ ९ ॥ कृष्णकृष्णेतिकृष्णेतिप्रत्यहंवक्तिवैकलौ ॥ नित्यंयज्ञायुतंपुण्यंतीर्थकोटिफलंलभे
त् ॥ १० ॥ यस्तुपुत्रःशुचिर्दक्षःपूर्वेवयसिधार्मिकः ॥ विष्णुकीर्तनसंयुक्तस्तंपुत्रंकवयोविदुः ॥११॥ स्नात्वागायंतिगोमत्यांकृष्णंकलिमलाप
हम् ॥ नतेषांविषयेदूतागच्छंतियमकिंकराः॥१२॥ येवैद्विजातयोनित्यंक्षत्रियाश्चविशस्तथा ॥ त्रिवर्णपूजासंयुक्ताःशूद्राश्चान्येशरीरिणः ॥१३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पठंतिगीतामग्रेतेमुक्तास्तत्रनसंशयः ॥ म्लेच्छतुल्यस्वभावास्तेयेनभक्ताममानघे ॥ १४ ॥ संकीर्णयोनयःपूतायेभक्ताममभामिनि ॥
कुदेशोपिभवेत्पुण्योयत्रभागवतःकलौ ॥१५॥ नास्तिनास्तिमहाभागेयुगंहिकलिनासमम् ॥ स्मरणात्कीर्तनाद्यत्रप्राप्यतेपदमव्ययम् ॥१६॥
स्त्रीराजबालघातीचयेचविश्वासघातकाः ॥ स्वर्णापहारीपापिष्ठोमार्गघ्नोग्रामदाहकः ॥ १७ ॥ मातृगामीसुरापीचसुतघ्नःसर्वनिंदकः ॥ मातृहा
पितृहाचैवभ्रूणहागुरुतल्पगः ॥ १८ ॥ एतेचान्येचपापिष्ठामहापापयुताश्चये ॥ सर्वपापैःप्रमुच्यंतेकृष्णरामेतिकीर्तनात् ॥ १९ ॥ किं वेदैः
श्रद्धयाधीतैर्व्याख्यातैरपिकृत्स्नशः ॥ धर्मशास्त्रादिभिश्चैवयोगशास्त्रैश्चकिंभवेत् ॥ २० ॥ सेतिहासैःपुराणैश्चव्रतदानैर्जपादिभिः ॥ सप्तद्वीपा
दिभूदानैर्दानैश्चान्यैश्चकृत्स्नशः ॥ २१ ॥ गजाश्वरथदानैश्चदेवालयप्रतिष्ठया ॥ सेवितैःक्षेत्रतीर्थादितपोभिर्विविधैश्चकिम् ॥ २२ ॥ सर्वेश्वर
स्यकृष्णस्यस्मृतिर्मेयस्यजायते ॥ कलौदोषनिधौकांतेगुणस्त्वेकोमहान्भुवि ॥ २३ ॥ कीर्तनादेवकृष्णस्यमुक्तोबंधात्परंव्रजेत् ॥ कलिंसभा
जयंत्यार्यागुणज्ञासारभागिनः ॥ २४ ॥ यत्रसंकीर्तनेनैवस्वार्थादिरिहलभ्यते ॥ हरेर्नामैवनामैवनामैवममजीवनम् ॥ २५ ॥ कलौनास्त्येव
नास्त्येवनास्त्येवगतिरन्यथा ॥ घोरेकलियुगेप्राप्तेसर्वधर्मविवर्जिते ॥ २६ ॥ वासुदेवपरास्तेवैकृतार्थानात्रसंशयः ॥ तेसुभाग्यामनुष्येषुकृता
र्थाःकमलालये ॥ २७ ॥ स्मरंतिस्मारयंत्येवमन्नामानिमलिम्लुचे ॥ हरिनामपरायेचघोरेकलियुगेरमे ॥ २८ ॥ तएवकृतकृत्याश्चनकलिर्बा
धतेहितान् ॥ शिवपूजाकरायेचशिवनामपरायणाः ॥ २९ ॥ तएवकृतकृत्याश्चनकलिर्बाधतेहितान् ॥ घोरेकलियुगेप्राप्तेसर्वकर्मबहिष्कृते ॥
॥ ३० ॥ हरिकीर्तनमेवात्रसंपूर्णफलदायकम् ॥ नाम्नोमेयावतीशक्तिःपापनिर्दलनेरमे ॥ ३१ ॥ तावत्कर्तुंनशक्नोतिपातकंपातकीजनः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः ॥ ३२ ॥ अनिच्छयापिसंस्पृष्टोदहत्येवहिपावकः ॥ सकृन्नारायणेत्युक्त्वापुमान्कल्पशतैरपि ॥ ३३ ॥
गङ्गादिसर्वतीर्थेषुस्नातोभवतिनित्यशः ॥ अशक्तेनापिशक्तेनकलौकामिनिमत्प्रिये ॥ ३४ ॥ मासिनामान्यनुरतंममग्राह्याणिमानवैः ॥ सर्वका
माश्चमुक्तिश्चहस्तेतेषांवरानने ॥ ३५ ॥ येस्मरंतिनरानित्यंनाममेसर्वरूपिणः ॥ सकृदुच्चारितंयेनहरिरित्यक्षरद्वयम् ॥ ३६ ॥ बद्धःपरिकरस्ते
नमोक्षायगमनंप्रति ॥ आलोड्यसर्वशास्त्राणिविचार्यचपुनःपुनः ॥ ३७ ॥ इदमेवसुनिष्पन्नंध्येयोनारायणःसदा ॥ आदावंतेचमध्येचवि
ष्णुःसर्वत्रगीयते ॥ ३८ ॥ इति श्रीपद्मपुराणेमलमासमहात्म्येनामकीर्तनमहिमवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ श्रीरुवाच ॥ ॥
देवदेवदयासिंधोवदकिंचिन्ममाद्भुतम् ॥ मलमासेनचीर्णेनभवेत्सकलसत्कृतम् ॥ १ ॥ ॥ श्रीविष्णुरुवाच ॥ शृणुक्षीरोदतनयेसर्वदानंददा
यिनि ॥ सर्वोपरिदयादृष्टेसर्वानुग्रहकारिणि ॥ २ ॥ तपसांचैवसर्वेषांयत्तपःपरमव्ययम् ॥ यदाचरंतिमनुजाःसर्वघ्नंतितदाह्यघम् ॥३॥सर्वधर्म
फलंलब्ध्वागच्छंतिपदमव्ययम् ॥ तदहंसंप्रवक्ष्यामिलोकानुग्रहहेतवे ॥ ४ ॥ अन्नंहिप्राणिनांप्राणाअन्नेलोकाः प्रतिष्ठिताः ॥ अन्नंवीर्यंबलंन
मसर्वदेवमयंतथा ॥ ५ ॥ तद्दत्तंयेनवैपुंसांनदत्तंकिंशिशिस्वसः[1] ॥ गुणिनेवादरिद्रायक्षुधितायजनायच ॥ ६ ॥ तेनात्मसुखसिद्धौतुसत्कृतंसर्व
भोगतः ॥ तदन्नंयेनसंदत्तंतावद्यावन्ममाप्रिये ॥ ७ ॥ तेनसांसारिकंसर्वं किलत्यक्तंमुमुक्षुणा ॥ अथवाफलकामेनयदितद्दत्तमादरात् ॥ ८ ॥
सर्वकर्मफलान्यस्यहस्तगान्येवसर्वदा ॥ तस्मात्सर्वप्रयत्नेनमासेऽधिकसमाह्वये ॥ ९ ॥ उपवासव्रतंकुर्यात्सर्वकामफलाप्तये ॥ मासोपवासं

१ हेलक्ष्मि ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाकुर्यात्पक्षेतुह्युपवासकः ॥ १० ॥ षड्रात्रंवात्रिरात्रंवाव्रतमेकांतरंतुवा ॥ एकंवाप्युपवासंतुशक्तितस्तुसमाचरेत् ॥११॥ नरोवायदिवानारीकु
मारीवाकुमारकः॥ज्वरवान्वाथवृद्धोवाविधवातुविशेषतः ॥१२॥ एकेनाप्यपवासेनकृतकृत्योभवेदिह ॥ अत्रतेकथयिष्यामिकथांपौराणिकींशु
भाम्॥१३॥यांश्रुत्वासर्वलोकानांविश्रंभःपरमोभवेत् ॥ अस्तिश्रीनर्मदातीरेपुरीमाहिष्मतीकिल॥१४॥तत्रकाचिन्महाभागाब्राह्मणीह्यभवत्पुरा॥
नाम्नासातापसीख्याताकर्मणाचापितादृशी ॥ १५ ॥ तपश्चचारविपुलंमलमासोपवासिनी ॥ तस्याःकदाचित्समयेसखीकाचित्तुरीयजा ॥
॥ १६ ॥ कर्मकर्त्रीसमाख्याताकुष्ठयुक्तानृखंजिका ॥ अभवत्सामुमूर्षुवजातातत्समयेतथा ॥ १७ ॥ सोक्ताविप्रसहचरीमह्यंकिंचित्तपोऽर्पय ॥
येनाहंसुसुखंभुक्त्वासंसृतेःपारमाप्नुयाम् ॥ १८ ॥ दयापरासिभूदेविसख्यंतेसार्थकंकुरु ॥ इत्युक्तासातयासख्यातापसीकरुणापरा ॥ १९ ॥
ददावेकोपवासस्यमलमासकृतस्यवै ॥ फलंससलिलंहस्तेदत्तमात्रेदिवस्तले ॥ २० ॥ विमानंमहदायातंदिव्यभोगसमन्वितम् ॥ तत्रारूढातु
तद्यानंतापसींससखीमियम् ॥ २१ ॥ स्तुत्वाबहुविधैर्वाक्यैर्जगामत्रिदशालयम् ॥ बहुकालंमहाभोगान्भुक्त्वाचैवभुवस्तले ॥ २२ ॥ काशी
नाथसुतात्वंचलब्ध्वातत्रापिशंबहु ॥ भुक्त्वादेहविसृष्टौतुपुनःशंकरलोकगा ॥ २३ ॥ लोकानुग्रहणार्थायकाश्यांचंद्रेश्वरीपुनः ॥ वर्ततेद्यापि
विबुधैर्वंद्यालोकैस्तुपूजिता ॥ २४ ॥ मलमासदिनैकस्यफलंप्राप्तासखीकरात् ॥ काश्यांतिष्ठतिसाशूद्रीयावदाचंद्रतारकम् ॥ २५ ॥ एवंगुणो
मलोमासोदासोप्यस्मिन्व्रतीसुरः ॥ भवेद्यथासादास्येकाजाताशिववधूसमा ॥ २६ ॥ तस्मादेकोपवासोवैकर्त्तव्यःशुभमिच्छता ॥ परत्रेहच
संसारभीरुणाचारुहासिनि ॥ २७ ॥ इतिश्रीपद्मपुराणेमलमासमाहात्म्येउपवासफलकथनंनामनवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्ष्मीरुवाच ॥ ॥ भगवन्ब्रूहिमेसर्वंमलमासस्ययत्फलम् ॥ उपवासस्यसामर्थ्यंयेषांनास्तिमलिम्लुचे ॥१॥ किंकर्त्तव्यंनरैस्तैस्तुकथंपापक्ष
योभवेत् ॥ तद्वदस्वसुरश्रेष्ठकृपांकृत्वाममोपरि ॥ २ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिव्रतंपापप्रणाशनम् ॥ येषामुपोषणे
शक्तिर्नास्तिकिंचिच्चभक्षणे ॥ ३ ॥ तैरेकभुक्तंकर्तव्यंहविष्यान्नेननित्यशः ॥ तथामौनंचकर्त्तव्यमनंतफलमीप्सुभिः ॥ ४ ॥ उपवासेनयत्पुण्यं
तत्पुण्यंमौनभोजने ॥ मौनेनसर्वपापेभ्योनरोमुच्येदसंशयम् ॥ ५ ॥ मौनाद्भवतिसौभाग्यंमौनाद्रूपंप्रजायते ॥ मौनात्प्रवर्ततेकीर्त्तिस्तस्मान्मौ
नंसमाचरेत् ॥६॥ मौनात्कलहहानिःस्यान्मौनादायुःप्रवर्धते ॥ मौनाच्चैवाप्यतेसौख्यंतस्मान्मौनंसमाचरेत् ॥७॥ त्रिषुमौनंसदाकार्य्यंस्नाने
होमेचभोजने ॥ मौनेनयत्फलंदेविवित्रिषुस्थानेषुतच्छृणु ॥ ८ ॥ स्नानेनप्राप्यतेतेजोजुह्वतःश्रियमुत्तमाम् ॥ भुंजानोलभतेचायुस्तस्मान्मौनंस
माचरेत् ॥ ९ ॥ एतेषुत्यजतोमौनंपुरुषस्याल्पमेधसः ॥ आयुःश्रेयःश्रियोयांतितस्मान्मौनंसमाचरेत् ॥१०॥ स्नानेनवरुणस्तेजोजुह्वतोग्निःश्रि
यंहरेत् ॥ भुंजानोमृत्युरायुष्यंतस्मान्मौनंसमाचरेत् ॥ ११ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ मौनंकतिविधंप्रोक्तंकियंतंकालमेवच ॥ एतत्सर्वंसवि
स्तारंब्रूहिमेवदतांवर ॥ १२ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मौनंतुद्विविधंप्रोक्तंपापघ्नंममतुष्टिदम् ॥ प्रथमंभोजनांतंचप्राणाहुत्यंतमेवच ॥ १३ ॥
प्रथमंपूर्णफलदंकिंचिन्न्यूनंद्वितीयकम् ॥ मौनाच्छीलमवाप्नोतिसर्वपापैःप्रमुच्यते ॥१४॥ यःकरोतिनरोमासेमौनमक्षयमश्नुते ॥ प्रायश्चित्तंपरं
ह्येतन्महापातकनाशनम् ॥१५॥ यंयंकामयतेकामंतंतंप्राप्नोतिमानवः ॥ नारदेनपुरामौनात्प्राप्तंज्ञानमतींद्रियम् ॥ १६ ॥ सत्संगात्मकृपालो
कान्मौनव्रतप्रभावतः ॥ संत्यज्यदासीपुत्रत्वंब्राह्मणत्वमुपागतः ॥१७॥ मलापकर्षकेमासेस्नानंतेनदिनत्रयम् ॥ कुरुक्षेत्रेततोजातोब्रह्मणोमानसः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुतः ॥ १८ ॥ सर्वफलंचमौनेनतिथिनक्षत्रयोस्तुतम् ॥ इष्टापूर्तफलंतस्यमलमासेतुमौनतः ॥ १९ ॥ मासानांमलमासोयंश्रेष्ठः सर्वाधिकः
स्मृतः ॥ किंस्याच्चतीर्थयात्राभिःक्लेशात्यंतप्रदायिभिः ॥ २० ॥ एकतोमलमासोयमेकतोद्वादशाब्दिकम् ॥ समानमत्रनभवेत्किंपुनर्मौ
नभोजनात् ॥ २१ ॥ एकतोपृथिवीदानमेकतोमौनभोजनम् ॥ तत्समंचात्रकथितंशिवेनब्रह्मणामया ॥ २२ ॥ एकतःसर्वदानानि
मलमासस्तथैकतः ॥ तुलयातोलितोदेविनसमानिमलिम्लुचे ॥ २३ ॥ धन्योवैमानवोलोकेयःस्नातिमलमासिके ॥ ततोधन्यतमःसोपिदी
पदःपुरुषोत्तमे ॥ २४ ॥ मौनव्रतीततोधन्यःस्नानेवैभोजनार्चने ॥ आजन्मतःकृतात्पापान्मुच्यतेनात्रसंशयः ॥ २५ ॥ व्याजेनापिकृतंदे
वित्रतंवैपुरुषोत्तमे ॥ तस्यदर्शनमात्रेणपुनातिसकलंजगत् ॥ २६ ॥ मलिम्लुचेकृतंयैस्तुमद्भक्त्यामौनभोजनम् ॥ स्वर्गमोक्षफलावाप्तिस्त
स्यसिद्धिर्नसंशयः ॥ २७ ॥ उपवासेनयत्पुण्यंजायतेशतवत्सरात् ॥ तत्पुण्यंलभतेदेविमौनेनैकेनमानवैः ॥ २८ ॥ इति श्रीपद्मपुराणेमलमासमा
हात्म्येमौनव्रतफलकथनंनामदशमोऽध्यायः ॥ १० ॥ श्रीकृष्णउवाच ॥ अत्रापिकथयिष्येहमितिहासंपुरातनम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यते
नात्रसंशयः ॥ १ ॥ पुराह्यवंतीविषयेब्राह्मणःसंशितव्रतः ॥ वेदशर्मेतिनाम्नावैख्यातः सूर्यइवापरः ॥ २ ॥ स्वाध्यायनिरतःशांतस्तपसादग्धकि
ल्बिषः ॥ निरीहोनिरहंकारोनिर्ममोविजितेंद्रियः ॥ ३ ॥ तस्येत्थंवर्तमानस्यस्वधर्मनिरतस्यच ॥ मलमासःसमायातःकदाचित्कालपर्ययात्
॥ ४ ॥ मनसाचिंतयामाससद्विजःकिंकरोम्यहम् ॥ शरीरेनास्तिसामर्थ्यमुपवासस्यमेधुना ॥ ५ ॥ कृत्वायदुपवासस्यसम्यक्फलमवाप्नुयाम् ॥

१ उज्जयिनीतिप्रसिद्धे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिचिंतयतस्तस्यनिद्रयापहृतस्यच ॥ ६ ॥ स्वप्नमध्येसमागत्यकथितंमौनभोजनम् ॥ त्यक्त्वानिद्रांसमुत्थायआनंदाश्रुकुलेक्षणः ॥७॥समौ
नमशनंचक्रेयावन्मासःसमाप्यते ॥मासांतेदर्शदिवसेप्रातश्चोद्यापनंकृतम् ॥८॥ तस्यानुग्रहकामार्थमागतःपुरुषोत्तमः॥वरेणच्छंदयामाससवव्रे
वरमुत्तमम्॥९॥भुविभक्तिंपरांचैवप्रेम्णाभक्तजनस्यच॥तज्जन्मनिपरंसौख्यंचक्रवर्तित्वदुर्लभम्॥१०॥नानाविभवभोगांश्चमहादानविधायिना॥
द्विजानांनित्यसेवाचमनोवाक्कायकर्मभिः॥११॥दीनेष्वनुग्रहंचैवपरदुःखनिहंतृता॥आरोग्यताशरीरस्यस्वजनस्यावियोगता ॥१२॥धनंधान्यं
गृहेक्षेत्रेशरीरारोग्यतातथा ॥ स्वदेहेनतुवैकुंठदर्शनंसुरदुर्लभम् ॥ १३ ॥ एवंनानाविधाभोगावरामंत्तोहिचार्थिताः ॥ दत्तामयासुमनसाव्रतेन
परितोषिणा॥१४॥अंतर्धानमतश्चक्रेतंद्विजंपरितोष्यवै॥मय्यंतर्धानमापन्नेतेनभुक्तंसुखंबहु॥१५॥इष्टंबहुविधैर्यज्ञैः पूर्तंबहुविधंकृतम् ॥ नाना
दानानिदत्तानिसुहृदःसुखिनःकृताः ॥१६॥तदिच्छयातुकालेनविमानंप्रेषितंमया ॥ नानाभोगैःसमाकीर्णंकाम्यमानंसुरैरपि॥१७॥उपविश्य
विमानंवैवैकुंठंप्रतिनिर्ययौ ॥ आगच्छतस्तस्यदिविपूजांचक्रुर्दिवौकसः॥१८॥धन्यस्त्वंकृतकृत्यश्चयेनेदंव्रतमुत्तमम्॥मौनादिकंकृतंविप्रतस्येदं
फलमीदृशम् ॥१९॥इंद्रस्तमाहसंपूज्यदेहिमेकिंचिदीप्सितम् ॥ मौनव्रतदिनैकस्यफलंकृत्वाकृपांमयि ॥२०॥ तेनदत्तंफलंतस्मैदिनैकस्यदया
लुना ॥ तत्प्रभावात्सुरेंद्रेणदुष्टोवृत्रोनिषूदितः॥२१॥सविप्रोद्यापिवैकुंठेवसतेबहुसौख्यभाक्॥एवंकृत्वाधिकेमौनंव्रतीकिंलभतेनवै ॥ २२ ॥ इति
श्रीपद्मपुराणेमलमासमाहात्म्येमौनव्रतफलकथनंनामैकादशोऽध्यायः ॥ ११ ॥ छ ॥ श्रीरुवाच ॥ ॥ मलिम्लुचेहृषीकेशपुराणपुरुषोत्तम ॥
पंचपर्वकृतंनृणांकिंफलंस्याद्वदाच्युत ॥ १ ॥ इतिपृष्टस्तयादेव्याभगवानादिपूरुषः ॥ उवाचवचनंध्यात्वापंचपर्वकथानकम् ॥ २ ॥ ॥ श्रीकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्णउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिपर्वाणितुयथाक्रमम् ॥ वैधृतिश्चव्यतीपातोराकाचैवकुहूस्तथा ॥ ३ ॥ द्वादशीपंचपर्वाणिपरंश्रेष्ठान्यनुक्रमात्
तुष्यामिवैधृतौचाहंव्यतीपातेतुधर्मराट् ॥ ४ ॥ पितामहःपौर्णमास्यांपितरोमादिनेशुभे ॥ वैधृतौस्नानहोमाभ्यांदानेनकमलालये ॥ ५ ॥ अहं
विष्णुर्मनुष्याणांवांछितार्थंददाम्यहम् ॥ वैधृतेश्चफलंदेविदेवानामपिदुर्लभम् ॥६॥वैधृतौयत्प्रदत्तंहिधनंधान्यंफलादिकम्॥तिलाःसर्पिःपयश्चैव
तेषामंतोनविद्यते ॥ ७ ॥ वैधृतौचाक्षयंपुण्यंसंक्रात्यधिकमुच्यते ॥ निमिषेनिमिषेकांतेवर्धतेनात्रसंशयः ॥ ८ ॥ मलमासेविशेषेणमत्प्रिये
चारुहासिनि ॥ तस्यपुण्यप्रभावेनप्रह्लादोदैत्यनायकः ॥ ९ ॥ इंद्रत्वंप्राप्तवान्कांतेत्रिषुलोकेषुविश्रुतम् ॥ अन्यायादेवताःसर्वावैधृतेर्दा
नयागतः ॥ १० ॥ देवत्वमुपपन्नास्तेत्रिषुलोकेषुविश्रुतम् ॥ सर्वत्रपूज्यतांप्राप्ताअहन्यहनिभूतले ॥ ११ ॥ तद्वद्व्रतीसमाप्नोतिकुलेमहति
पूज्यताम् ॥ वैधृतेर्दानमाहात्म्यंसंख्यावर्षशतैरपि ॥ १२ ॥ वक्तुंनशक्यतेदेविब्रह्मणाचपुराकृतम् ॥ वैधृतान्सकलान्देविप्रतिमासंव्रतं
चरेत् ॥१३॥ घृतेनपयसावाथमधुनासितयाथवा ॥ तिलचूर्णैर्नारिकेलैर्द्वादशद्वादशापिवा ॥ १४ ॥ वैधृतौदुःखसाकल्याद्वर्जितासाभवेत्सदा ॥
पूगंपत्रंषोडशकंयोदद्याद्वैधृतौनरः ॥ १५ ॥ षोडशाब्दंषडाधिक्यंसंख्ययाजायतेहितत् ॥ एकेनाचरितेनापिवैधृतेनमलिम्लुचे ॥ १६ ॥
पूर्वोक्तंसकलंपुण्यंजायतेनात्रसंशयः ॥ वैधृतेर्दानमाहात्म्यंसंख्ययाकथितंतव ॥ १७ ॥ अतस्तत्कथयिष्यामिव्यतीपातेचयत्फलम् ॥ सदावैयोग
राजोयंख्यातःसूर्यसमप्रभः ॥ १८ ॥ धर्मोधर्मस्तुसंप्राप्तोव्यतीपातप्रभावतः ॥ लोकेषुधर्मतांप्राप्तस्त्रिषुलोकेषुवल्लभः ॥ १९ ॥ सूर्याचंद्रम
सोर्योगादुत्पन्नःसपुराकिल ॥ पूर्वंपुराणेवाराहेविस्तरात्कथितंमया ॥ २० ॥ अधुनातन्नशक्नोमिबहुवक्तुंयथाफलम् ॥ प्रीणातिधर्मराजोयंमंत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दानेनसुंदरि ॥ २१ ॥ कुरुक्षेत्रेरवौग्रस्तेदानंदत्त्वाद्विजोत्तमे ॥ व्यतीपातेतथादत्तंमाससंख्याविवर्धते ॥ २२ ॥ चक्रतीर्थेतथाकाश्यांमरणे
यत्फलंलभेत् ॥ तत्फलादधिकंप्रोक्तंव्यतीपातेतुदानतः ॥ २३ ॥ एकतःसर्वदानानिसर्वपर्वसुनित्यशः ॥ एकतस्तुषमात्रंतुपातेहेमसद
क्षिणम् ॥ २४ ॥ सर्वदानाधिकंपुण्यंव्यतिपातप्रभावतः ॥ प्रतिमासंविवर्धेतसंख्यातेभ्यःशताधिका ॥ २५ ॥ तस्मिंस्तपः
प्रभावेनऋषयःस्वर्गवासिनः ॥ तत्रदत्तेनसुप्रीताःसदाभुंजंतिपूर्वजाः ॥ २६ ॥ धान्यंदत्तंव्यतीपातेहिरण्यंवाब्धिजेरवौ ॥ अनंतफलदंसर्व
मग्निहोत्रफलंयथा ॥ २७ ॥ भाद्रपदेऽमावास्यांगंगायांयत्फलंस्मृतम् ॥ तत्फलंचाधिकेप्रोक्तंव्यतीपातेद्विजार्पितम् ॥ २८ ॥ व्यतीपातमहायो
गस्त्रिषुलोकेषुविश्रुतः ॥ धन्यास्तेमानवालोकेपातेयैस्तुद्विजार्पितम् ॥ २९ ॥ धान्यंकिंचित्सुवर्णंवाश्रद्धयासहितंप्रिये ॥ तेभ्यःकोटिगुणंपुण्यं
संख्यादानस्यनास्तिहि ॥ ३० ॥ तिलपात्रंतत्रदत्तंप्राणांतेहंसमर्पयेत् ॥ धान्यंधन्यतमास्तेहितथामद्व्रतकारकाः ॥ ३१ ॥ मलिम्लुचेव्यतीपा
तेएकस्मिन्नपियत्कृतम् ॥ स्नानदानादिकंदेविवक्तुंकेनैवशक्यते ॥ ३२ ॥ स्वल्पेप्यस्मिन्कृतेपुण्येव्यतीपातेमलिम्लुचे ॥ पुण्यानामप्यनेकेषां
फलंभवतिनिश्चितम् ॥ ३३ ॥ तस्मिन्मलिम्लुचेपातेयेनकेनापिमानवैः ॥ दानंदेयंविशेषेणसंसारभयभीरुभिः ॥ ३४ ॥ एतत्तेकथितंदेविव्यती
पातफलंहितत् ॥ संक्षेपेणमयोक्तंतेविस्तरेणनशक्यते ॥ ३५ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येपंचपर्वमहिमवर्णनंनामद्वादशोऽध्यायः ॥ १२ ॥
॥ श्रीलक्ष्मीरुवाच ॥ भगवन्मेव्यतीपातविभागेषुचयत्फलम् ॥ तद्ब्रूहित्वंविशेषेणसमासेनजगद्गुरो ॥ १ ॥ श्रीकृष्णउवाच ॥ व्यतीपातेतुस
कलेपुण्यंस्यान्महदेवहि ॥ तथाचतारतम्यंवैभागेभागेबुधैःस्मृतम् ॥ २ ॥ तत्तेहंसंप्रवक्ष्यामिशृणुष्वहृदयंगमे ॥ दर्शेशतगुणंदानंतच्छतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुदिनक्षये ॥ ३ ॥ शताच्छताच्चसंक्रांतौशतोत्थंविषुवेषुच ॥ युगादौतच्छतगुणमयनेतच्छताधिकम् ॥ ४ ॥ सोमग्रहेशतगुणंतच्छतंतुरविग्रहे ॥
असंख्यत्वंव्यतीपातेदानंदानविदोविदुः ॥ ५ ॥ उत्पातेलक्षगुणितंभ्रमणेकोटिरुच्यते ॥ अर्बुदंपतनेप्रोक्तमक्षय्यंपतितेफलम् ॥ ६ ॥
जन्मद्वाविंशतिर्नामभ्रमणंचैकविंशतिः ॥ व्यतीपातस्यपतनेदशसप्तास्थितिंविदुः ॥ ७ ॥समर्पितंयद्व्यतिपातकालेपुनःपुनस्तद्रविशीतरश्मिः ॥
प्रयच्छतेकल्पशतार्बुदानिविवर्धमानंनहिहीयतेतत् ॥ ८ ॥ शुभेव्यतीपातदिनेऽवगाहन्सपंचगव्येनमहानदीजले ॥ उपासतेयोयमुनानदीजलं
जपेच्चशुद्धोव्यतिपाततेनमः ॥ ९ ॥ पूजाविधिंपुरस्कृत्यकृतकृत्योभवेन्नरः ॥ मलिम्लुचेविशेषेणतस्मात्कार्यंमनीषिभिः ॥ १० ॥ पौर्णमास्याः
फलंवक्ष्येब्रह्मणःप्राप्तिहेतवे ॥ प्रीतेब्रह्मणिसुप्रीताःसर्वेपितृदिवौकसः ॥ ११ ॥ स्नानंकृत्वाद्विजातिभ्यःप्रदातव्यंसुवर्णकम् ॥ यद्यदिष्टतमंवस्तु
स्थावरंजंगमंतथा ॥ १२ ॥ वैशाखीकार्तिकीमाघीरौद्रीब्राह्मीचवैष्णवी ॥ विशेषफलदास्तिस्रःपिंडदानेऽक्षयंफलम् ॥ १३ ॥ यद्व्रतंपौर्णमा
स्यांतुसर्वमश्नंतिदेवताः ॥ पूर्णिमांतुविदुःप्राज्ञादेवानांकेवलोविधिः ॥ १४ ॥ अश्नंतिदेवाःपितरोदैवेकर्मण्यमादिने ॥ माघ्यांतुमाधवोदेवः
फाल्गुन्यांरजनीकरः ॥ १५ ॥ चैत्र्यांतुदेवोह्यानंदोवैशाख्यांपितृदेवताः ॥ ज्यैष्ठ्यांतुब्रह्मासावित्रीआषाढ्यांतुविशेषतः ॥ १६ ॥ मार्गशीर्षेदेव
पितरोमनुष्यायक्षकिंनराः ॥ देवीभवानीपौष्यांतुप्रीताभवतुसर्वदा ॥ १७ ॥ पैतृकंमुनिभिःप्रोक्तममावास्यादिनंयथा ॥ दिनंतथापौर्णमासं
दैविकंपरिकीर्तितम् ॥ १८ ॥ पर्वभिस्तुकृतैरन्यैर्बहुभिःकिंप्रयोजनम् ॥ यद्येकवाससामर्त्यैःश्रद्धयापरिसेव्यते ॥ १९ ॥ यावज्जीवंमर्त्यलोके

१ समरात्रिदिवेकाले ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानदानादिभिःकृतैः ॥ स्नानैकेनपूर्णिमायांदिनंभवतिसार्थकम् ॥ २० ॥ ऋणान्मुक्तोनरोदैवात्पैतृकाद्दर्शकेदिने ॥ स्नानंकर्तुंनशक्तोयोदि
नंप्रतिसुरेश्वरि ॥ २१ ॥ तेनकार्यंपौर्णमास्यांस्नानंवैपितृतर्पणम् ॥ पूर्णिमायाःफलंसर्वंकथितंसफलंप्रिये ॥ २२ ॥ अमावास्याफलंतोहिपि
तॄणांप्रीतिवर्धनम् ॥ पर्वणामुत्तमंपर्ववक्ष्येसंक्षेपतस्तव ॥ २३ ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ अमावास्यासमंदेविनास्तिपर्व
जगत्त्रये ॥ २४ ॥ मासांतेबहुलासापिपितॄणांमुक्तिदायिनी ॥ त्रयोदशगुणंदानंदर्शेतावद्दिनानिच ॥ २५ ॥ वर्धतेप्रत्यहंसत्यंनात्रकार्याविचारणा ॥ मासिमासित्वमावास्यादिनेप्राप्तेनराधमः ॥ २६ ॥ योहिदद्यान्नपिंडांस्तुनसपुत्रोपितानसः ॥ शीतार्तायद्वदिच्छंतिक्षुधाक्षामाय
थानराः ॥ २७ ॥ तद्वदिच्छंतिपितरःसंप्राप्तेचेंदुसंक्षये ॥ निर्वपंतिचयेश्राद्धंप्रतीताःपुत्रकाःप्रिये ॥ २८ ॥ इंदुक्षयेमासिमासिब्रह्महाजायते
हिसः॥योनकुर्याद्धिमासांतेपितॄणांपिंडपातनम् ॥ २९ ॥ सदावांछतिसुप्रीतान्पुत्रपौत्रपशूंस्तथा ॥ वनस्पतिगतेसोमेनकुर्यात्पितृतर्पणम् ॥
॥ ३० ॥ तंमासंपितरस्तस्यकुर्वंतोवायुभोजनम् ॥ तस्यविघ्नंप्रयच्छंतिक्षुधितास्तृषितास्तथा ॥३१ ॥ तेसंतर्तिनाशयंतिसंपदोभवनानिच ॥
तस्मादमायांकर्तव्यंस्नानदानजपादिकम् ॥ ३२ ॥ मलिम्लुचेविशेषेणमहापुण्यप्रदंस्मृतम् ॥ किंबहूक्तेनदेवेशिनरैःकार्यंमहाव्रतम् ॥ ३३ ॥
इतिश्रीपद्मपुराणेमलमासमाहात्म्येपंचपर्ववर्णनंनामपूर्णिमाव्रतकथनंत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रीलक्ष्मीरुवाच ॥ ॥ पुरुषोत्तमहृषी
केशभक्तिप्रियदयानिधे ॥ द्वादश्याश्चैवमाहात्म्यंवदलोकहितायच ॥ १ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिद्वादशीफलमुत्तम
म् ॥ मलमासेविशेषेणमुनिभिर्भाषितंपुरा ॥२॥ पर्वणामुत्तमंपर्वसर्वसंपत्प्रवर्धनम् ॥ यच्छ्रुत्वासर्वपापेभ्योनरोमुच्येदसंशयम् ॥३॥ संक्षेपतोदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नफलंश्रुत्वाकृच्छ्रात्प्रमुच्यते ॥ सर्वतीर्थानिनार्हंतिद्वादश्याःषोडशींकलाम् ॥ ४ ॥ तावद्गर्जंतितीर्थानितावद्यज्ञक्रियाःकिल ॥ तावद्गर्जंति
पर्वाणियावन्नायातिद्वादशी ॥ ५ ॥ उपोष्यैकादशींयस्तुपारणेद्वादशीदिने ॥ धात्रीमूलेपिंडदानंकरोतिपुरुषोत्तमः ॥ ६ ॥ कृता
यज्ञाखिलास्तेनगयायांपिंडपातनम् ॥ अहोधन्यास्तेचधन्यायेषांबुद्धिर्हरेर्दिने ॥ ७ ॥ तुलसीपत्रमिश्रान्नंमक्षिकापादमात्रकम् ॥ द्वा
दश्यांब्राह्मणेदत्तंतदन्नंमेरुतांव्रजेत् ॥ ८ ॥ द्वादश्यांपारणेयस्तुतोयदानंकरोतियः ॥ तत्तोयंसागरैस्तुल्यंसप्तभिःसागरात्मजे ॥ ९ ॥ द्वादश्यां
योदिनेप्राप्तेतर्पणंकुरुतेप्रिये ॥ जलंतदमृतीभूयापितॄणामुपतिष्ठति ॥ १० ॥ दिनमेकंहरेर्यस्तुनकरोतिचवाहनम् ॥ तस्यक्षेत्रेखिलंधान्यमक्षयं
चभवेत्प्रिये ॥ ११ ॥ द्वादशीदिनमेकंतुवाहनंनकरोतियः ॥ विमानैःसव्रजन्स्वर्गंयाम्यंनायातिदुर्गमम् ॥ १२ ॥ हरेस्तुदिवसेप्राप्तेभूमिदानं
करोतियः ॥ शतंकल्पावधिस्तस्यवैकुंठेवसतिर्भवेत् ॥ १३ ॥ हरेस्तुदिवसेप्राप्तेदत्तंवस्त्रंद्विजातये ॥ तेषांवासोष्टकल्पंचचंद्रस्यभवनेऽक्षयः॥
॥ १४ ॥ माधवस्यदिनेप्राप्तेकपिलांयःप्रयच्छति ॥ उद्धृतास्तेनपितरोधेनोरोम्णांचसंख्यया ॥१५ ॥ मुकुंददिवसेप्राप्तेविद्यादानंकरोतियः॥
सचिरंवसतेस्वर्गेपुनरावृत्तिदुर्लभम् ॥ १६ ॥ उपानहंधनंवस्त्रंयोददातिमलिम्लुचे ॥ द्वादश्यांद्वादशीनाथोददातिसर्वमीप्सितम् ॥ १७ ॥
द्वादश्यांयस्तुकृष्णायांमलमासेविशेषतः ॥ ददात्युपानहौरम्यौसदूतान्नैवपश्यति ॥ १८ ॥ पादुकेरत्नखचितेकारितेकनकादिभिः ॥ योयच्छ
तिसुविप्रायवैकुंठेवसतेचिरम् ॥१९॥ पट्टकूलंचकार्पासंकौशेयंतृणसंभवम् ॥ और्णिकंचौष्ट्रिकंदत्त्वासवसेत्तंतुवत्सरम् ॥ २० ॥ घृतंगव्यंमा
हिषंचददातिद्वादशीदिने॥वैकुंठेवसतेदिव्येयावदाभूतसंप्लवम्॥२१॥येनकेनाप्युपायेनघृतंदेयंमलिम्लुचे ॥द्वादश्यांतुविशेषेणकृष्णायांतुविशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः ॥ २२ ॥ घृतदानफलंसर्वमयावक्तुंनसुंदरि ॥ यद्घृतंदेवताभोज्यंरसेष्वतिरसोत्तमम् ॥ २३ ॥ द्वादश्यांप्रस्थसंख्याकंद्वादश्यांघृतमुत्तम
म् ॥ द्वादश्यामधिमासेवैद्वादशीशस्यतुष्टये ॥ २४ ॥ ददातितस्यकिंकार्यंद्वादश्यांतुशतैरपि ॥ द्वादश्यहर्मुखेयोगेतुष्टिर्विष्णोर्महात्मनः ॥
॥ २५ ॥ शतभाराज्यदोरामेमहाराज्याधिकारवान् ॥ भवेदत्रनसंदेहोसत्यंसत्यंवदाम्यहम् ॥ २६ ॥ अल्पस्यापिहिदानस्यघृतस्यवरवर्णि
नि ॥ यथाशक्तिप्रदत्तस्यवित्तशाठ्यंविनाजने ॥ २७ ॥ फलंसर्वेप्सितकरमैहिकामुष्मिकोद्भवम् ॥ भोगंसम्यग्ददात्येवसाकृपाममसुंदरि ॥
॥ २८ ॥ योददातिघृतंविप्रेद्वादश्यांचमलिम्लुचे ॥ घृतधेनुसहस्रैस्तुदत्तैर्माघ्यांतुयत्फलम् ॥ २९ ॥ तत्फलंलभतेनूनंयथावैधृतिकंबलैः ॥
पापकोटिसहस्राणिपापकोटिशतानिच ॥ ३० ॥ संक्षयंयांतिदेवेशिद्वादश्यांघृतदानतः ॥ गव्यंकोटिगुणंपुण्यंमाहिषंलक्षमात्रकम् ॥ ३१ ॥
कापिलंतुघृतंदत्तमनंतंद्वादशीदिने ॥ कृतंयेनमहद्भक्त्याघृतदानंद्विजन्मने ॥ ३२ ॥ कुलानितारयत्येवपूर्वेषांसप्तवैस्वयम् ॥ दत्ताश्चस्वर्णसंभू
तप्रतिमादक्षिणान्विताः ॥ ३३ ॥ घृतंदत्त्वाधिकेमासिद्वादश्यांकिमुशोच्यते ॥ बहुनोक्तेनकिंदेविसर्वदानतपःफलम् ॥ ३४ ॥ स्वल्पेनघृत
दानेनद्वादश्यांभक्तिपूर्वकम् ॥ द्विजन्मनेप्रदत्तेनप्राप्यतेनात्रसंशयः ॥ ३५ ॥ एतत्तेकथितंदेविपंचपर्वप्रसंगतः ॥ द्वादश्यांघृतदानंतुसर्वयज्ञा
धिकंस्मृतम् ॥ ३६ ॥ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्यपंचपर्वकथनेद्वादशीमहिमानामचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ श्रीकृष्णउ
वाच ॥ मलिम्लुचसमोमासोनतिथिर्द्वादशीसमा ॥ नान्नदानसमंदानंनदेवःपुरुषोत्तमात् ॥ १ ॥ द्वादश्यामन्नदानंवैयःकरोतिसुमध्यमे ॥ तेनै
वतारिताःसर्वेनरकाच्छतपूर्वजाः ॥ २ ॥ अन्नदःपुरुषोलोकेप्राणदातास्मृतोबुधैः ॥ अन्नमाश्रित्यतिष्ठंतिजीवाब्रह्मांडगोलके ॥ ३ ॥ चैत्रवैशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खयोर्वारिचेंधनंपौषमाघयोः ॥ स्वकालेपुण्यफलदमन्नंसर्वत्रसर्वदा ॥ ४ ॥ उपरागसहस्राणिव्यतीपातायुतानिच ॥ अमालक्षं
द्वादश्याःकलांनार्हतिषोडशीम् ॥ ५ ॥ द्वादश्यांयत्कृतंसर्वमक्षय्यंतद्भवेदिह ॥ द्वादश्यामक्षयंदानंद्वादश्यामक्षयोजपः ॥ ६ ॥ द्वाद
श्यामक्षयंस्नानंद्वादश्यामक्षयंतपः ॥ द्वादश्यामक्षयोहोमोद्वादश्यांसर्वमक्षयम् ॥ ७ ॥ ऋषिभिःसर्वगंधर्वैःशिवेनब्रह्मणामया ॥ निर्धा
रितंपुराह्येतद्वादश्यानसमंभुवि ॥ ८ ॥ तिथीनामधिपाःसर्वेब्रह्मणानिर्जराःकृताः ॥ यच्छंतितेफलंनित्यंद्वादश्याःफलदोह्यहम् ॥ ९ ॥
नगंगानगयातादृग्यादृशीद्वादशीतिथिः ॥ तिथीनामुत्तमाज्ञेयास्नानदानादिनाभृशम् ॥ १० ॥ निधीनामधिपोजातःकुबेरोद्वादशीव्रतात् ॥
इंद्रत्वंदेवराट्प्राप्तःप्रजासंयमनंयमः ॥ ११ ॥ द्वादश्यामधिमासस्ययःकरोतिममार्चनम् ॥ वस्त्रमन्नंघृतंवापिदेयंमत्प्रीतिहेतवे ॥ १२ ॥
तेधन्याःकृतकृत्यास्तेतैःप्राप्तंजन्मनःफलम् ॥ सर्वार्थोधिगतस्तैस्तुयैर्दत्तंद्वादशीदिने ॥ १३ ॥ कलायामपिद्वादश्यामन्नदानंकरोतियः ॥
सौभाग्यंवर्धतेतस्यतस्यायुर्नैवहीयते ॥ १४ ॥ पापकोटिसहस्राणिपापकोटिशतानिच ॥ विलयंयांतिदेवेशिमलमासेतिथौमम ॥ १५ ॥
माघस्नानसहस्रैस्तुप्रयागेयत्फलंलभेत् ॥ तत्फलंलभतेदेविद्वादश्यांचमलिम्लुचे ॥ १६ ॥ सन्निहत्यांकुरुक्षेत्रेकपिलाशतदानतः ॥
रवौग्रस्तेफलंयच्चतत्फलंद्वादशीदिने ॥ १७ ॥ योन्नंसर्षपमात्रंचददातिद्वादशीदिने ॥ तदन्नंमेरुतांयातिकिंपुनर्मलमासके ॥ १८ ॥ सकर्पूरंतु
तांबूलंद्वादश्यांयःप्रयच्छति ॥ यावत्कर्पूरकणिकाःपत्रसंख्याचयावती ॥ १९ ॥ तावत्कल्पंनिवसतिपितृभिःपरिवारितः ॥ विष्णुलोके
मुदायुक्तः स्तूयमानस्तुयोगिभिः ॥ २० ॥ नतेषांपरिवृत्तिस्तुविष्णुलोकात्कथंचन ॥ असंक्रांतावन्नदानंयैःकृतंद्वादशीदिने ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिषुलोकेषुतीर्थानिपुण्यान्यायतनानिच ॥ तिष्ठंतितावत्कालंहियावद्वैद्वादशीतिथिः ॥ २२ ॥ मादेविद्वारकांयाहिप्रयागंकाशिकामपि ॥
इहैवकुरुमद्भक्त्याद्वादश्यांद्वादशीव्रतम् ॥ २३ ॥ नकरोतिनरोमोहाद्दानंवैद्वादशीदिने ॥ दुःखदारिद्र्यरोगाणामास्पदंसोभिजायते ॥ २४ ॥
नद्वारकानोज्जयिनीनकाशीमथुरापिच ॥ गंगाद्वारंनकांचीवानायोध्याद्वादशीसमा ॥ २५ ॥ शुक्लावायदिवाकृष्णाउभयोरंतरंनहि ॥ ममप्रीतिक
रालोकेतिथिर्नद्वादशीसमा ॥२६॥ किंतस्यतीर्थैस्तपसासुपुण्यैर्वाकिमध्वरैः ॥ मलिम्लुचेसितेपक्षेद्वादश्यामन्नदस्यच ॥२७॥ द्वादश्यांप्रातरु
त्थायभक्त्यासंपूज्यमामपि ॥ घृताद्युपस्करयुतंदेयमन्नंद्विजोत्तमे ॥ २८ ॥ अन्नदानात्परंदानंनभूतंनभविष्यति ॥ किंबहूक्तेनदेवेशिनातिथिर्द्वा
दशीसमा ॥ २९ ॥ यस्यमासस्ययोदेवोद्वादश्यांतंप्रपूजयेत् ॥ असंक्रांतावहंपूज्योनाम्नावैपुरुषोत्तमः ॥ ३० ॥ प्रदद्याद्वस्त्रयुग्मंचउपवीतंतथा
घृतम् ॥उपानहौचदेवेशिद्वादश्यांमलमासके॥३१॥द्वादश्यामधिमासस्यफलंवक्त्रशतैरपि॥कृतंदानस्यकमलेवक्तुंकेनापिभूतले॥३२॥इत्येतत्क
थितंदेविद्वादशीमहिमानकम्॥मलमासस्यसुभगेश्रुतंसर्वार्थसाधकम् ॥३३॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येपर्वकथनेद्वादशीमहिमवर्णनं
नामपंचदशोऽध्यायः ॥ १५ ॥ श्रीरुवाच ॥ ॥ भगवन्देवदेवेशभक्तानुग्रहकारक ॥ आश्चर्यकारिकथितमाख्यानंपुरुषोत्तम ॥ १ ॥ मासेमलि
म्लुचेस्नानव्रतस्यफलमीदृशम् ॥ विशेषेणपुनर्ब्रूहिस्नानस्यफलमीश्वर ॥ २ ॥ श्रीकृष्णउवाच ॥ शृणुसुंदरिवक्ष्यामिमलिम्लुचकृतस्यच ॥
स्नानस्यफलमत्युग्रंपापपंजरभेदकम् ॥ ३ ॥ सर्वतीर्थेषुसुस्नातोधिमासेस्नातियोनरः ॥ वरदास्तस्यसर्वेस्युर्देवानास्त्यत्रसंशयः ॥ ४ ॥
यमलोकंनपश्यंतिस्नातामासिमलिम्लुचे ॥ सर्वकार्याणिसिद्ध्यंतिपरिपूर्णमनोरथाः ॥५॥ यःस्नात्यनुदितेसूर्येचाधिमासिजलेऽमले ॥ तस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैदशमासस्यफलंस्नातस्यजायते ॥ ६ ॥ यःकरोतिनरोभक्त्यास्नानंकेशवतुष्टये ॥ मलिम्लुचेसुतीर्थानांलभतेस्नानजंफलम् ॥७॥ विष्णु
पादोदकस्नानंमलमासेर्थकामदम् ॥ तस्मात्सर्वप्रयत्नेनतत्स्नानंभुविदुर्लभम् ॥ ८ ॥ यस्ययस्ययदास्नानंकुर्याद्देवस्यतुष्टये ॥ अधिकेसर्वदे
वानांप्रीतयेतत्प्रजायते ॥ ९ ॥ प्रयागेचाधिकेमासेस्नात्वादृष्ट्वाचमाधवम् ॥ प्रयांतिसर्वपापानिदग्ध्वाममसलोकताम् ॥ १० ॥ अपिपापसह
स्राणिकुर्वन्मर्त्योमलिम्लुचे ॥ पूर्वपापविशुद्धात्मास्नानमात्रेणजायते ॥११॥ सरस्वत्यांकृतंस्नानंयदिमर्त्यैर्मलिम्लुचे ॥ तेषांजन्मसहस्राणां
पापंयातिसहस्रधा ॥ १२ ॥ पितरस्तर्पितास्तेनपायसैर्मधुसर्पिषा ॥ येनस्नानंकृतंमासिमुक्त्यर्थमधिकेमले ॥ १३ ॥ कुरुक्षेत्रादितीर्थेषुनि
त्यस्नानेनयत्फलम् ॥ तत्फलंसमवाप्नोतिमन्मासस्नानयोगतः ॥ १४ ॥ गवांकोटिप्रदानस्यग्रहणेचंद्रसूर्ययोः ॥ अधिकेतदवाप्नोतिस्नात्वा
विमलवारिणा ॥१५॥ तथाविप्रसहस्राणांभोजनेनतुयत्फलम् ॥ तदेवद्विगुणंस्नात्वामन्मासाल्लभतेनरः॥१६॥देवादेवत्वमापन्नामन्मासस्नान
पुण्यतः ॥ ऋषयोनिर्मलाजातास्तथादेवर्षयोपरे ॥ १७ ॥ नकरोतिनरःस्नानंमन्मासेमूढचेतनः ॥ संसारनरकाद्घोरान्मुच्यतेनकदाचन ॥
॥ १८ ॥ नस्नातिमलमासेवैयोनरोममतुष्टये ॥ तस्यजन्मवृथालोकेभुवोभारायकेवलम् ॥ १९ ॥ दंभेनापिकृतंस्नानंमन्मासेमुक्तिदायकम् ॥
संसर्गेणापिसवनंकृत्वामर्त्योदिवंव्रजेत् ॥ २० ॥ भूधराःसरितोवृक्षानैवभारायभूतले ॥ परंभारायथोऽश्वातिविनास्नानंमलिम्लुचे ॥ २१ ॥
सर्वतीर्थमयंस्नानंमन्मासेजायतेध्रुवम् ॥ ऐहिकामुष्मिकफलंभक्त्यामेकमलालये ॥ २२ ॥ महेश्वरादिदेवानांसदासंतोषकारकम् ॥ तस्मात्स
र्वेषुकालेषुमन्मासेस्नानमाचरेत् ॥ २३ ॥ क्रतुंकृत्वामुनीनांयेप्रत्यासत्तिमखंडिताम् ॥ कामयंतेधिमासेतेकुत्रचित्स्नांतुसर्वदा ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनावह्निविनायज्ञमिष्टापूर्तिंविनाप्रिये ॥ वांछंतिस्वर्गंतेस्नांतुप्रातस्तोयेमलिम्लुचे ॥ २५ ॥ गोभूमितिलवासांसिस्वर्णधेन्वन्नकानिच ॥
अदत्त्वेच्छंतियेनाकंस्नांतुतेधिकमासके ॥ २६ ॥ त्रिरात्रेंदुव्रतैःकृत्स्नैःपराकैश्चनिजांतनुम् ॥ अशोष्येच्छंतियेस्वर्गंस्नांतुतेधिकमासके ॥
॥ २७ ॥ होमस्तुचैत्रेवैशाखेतपःपूजाचकार्तिके ॥ तपोहोमंतथादानंमलमासेधिकंत्रयम् ॥ २८ ॥ येलोकादानशीलानांयेलोकाविपिनौक
साम् ॥ लोकाअतिथिभक्तानांस्नायिनांतेमलिम्लुचे ॥ २९ ॥ देवलोकान्निवर्ततेपुण्यैरन्यैर्मनोरथैः ॥ कदाचिन्नानिवर्ततेमन्मासस्नायिनो
नराः ॥ ३० ॥ नातःपरतरंकिंचित्पवित्रंपापनाशनम् ॥ नातःपरंव्रतंकिंचिन्नातःपरतरंमहत् ॥ ३१ ॥ एतदेवपरंपथ्यंसद्योदुरितनाशनम् ॥
मयातुभ्यंसमाख्यातंलोकानांहितकाम्यया ॥ ३२ ॥ अज्ञातपातकंशुष्कंवाङ्मनःकर्मभिःकृतम् ॥ मलिम्लुचेकृतंस्नानंहंत्यघंसमिधोनलः ॥
॥ ३३ ॥ प्रामादिकंचयत्पापंज्ञानाज्ञानकृतंचयत् ॥ स्नानमात्रेणनश्येतमासिप्राप्तेममाधिके ॥ ३४ ॥ ॥ इति श्रीपद्मपुराणेमलमासमा
हात्म्येस्नानप्रशंसानामषोडशोऽध्यायः ॥ १६ ॥ कृष्णउवाच ॥ ॥ अधिमासेचसंप्राप्तेद्वादशीवाथपूर्णिमा ॥ व्यतीपातदिनंवापिकिं
चिद्दानंमहाफलम् ॥ १ ॥ सर्वयज्ञेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् ॥ तत्फलंसमवाप्नोतिविष्णुलोकेमहीयते ॥ २ ॥ तस्योक्तंदिवसेदानंयथो
क्तफलदंभवेत् ॥ आज्यपक्वंगुडैर्युक्तंत्रयस्त्रिंशदपूपकम् ॥ ३ ॥ कांस्यपात्रेविनिक्षिप्यशक्तितोदक्षिणान्वितम् ॥ उपानद्वस्त्रसंयुक्तंविप्रायविनि
वेदयेत् ॥ ४ ॥ कलाकाष्ठादिरूपेणयोनित्यंवर्ततेहरिः ॥ लोकेविप्रस्वरूपेणतस्मैकालात्मनेनमः ॥ ५ ॥ यस्यहस्तेगदाचक्रंगरुडोयस्यवा
हनम् ॥ शंखःकरतलेयस्यसमेविष्णुः प्रसीदतु ॥ ६ ॥ अधिमासेतुसंप्राप्तेघृतंवस्त्रमुपानहौ ॥ दानंगृहाणसर्वात्मन्व्रतसंपूर्त्तिहेतवे ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साज्यंचसगुडंचैवत्रयस्त्रिंशदपूपकम् ॥ प्राणिनांप्रीणनार्थायतस्मैकालात्मनेनमः ॥ ८ ॥ कुरुक्षेत्रमिदंदेशःसाक्षाद्विष्णुरयंद्विजः ॥
पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम ॥ ९ ॥ मलानांचैवशुद्ध्यर्थंपापप्रशमनायच ॥ पुत्रपौत्राभिवृद्ध्यर्थंतवदास्यामिभास्कर
॥ १० ॥ अधिमासेतुसंप्राप्तेपात्रेदत्तंजनार्दन ॥ त्वामुद्दिश्यसुराध्यक्षप्रसीदपुरुषोत्तम ॥ ११ ॥ येनाक्रांतास्त्रयोलोकादानवाश्चव
शीकृताः ॥ शरण्यंसर्वभूतानांमेविष्णुःप्रसीदतु ॥ १२ ॥ एवंसंपूज्यदेवेशंपुरुषोत्तममादृतः ॥ तस्यपुण्यफलंवक्तुंनाहंशक्तोनशंकरः॥
॥ १३ ॥ मलिम्लुचेव्रतंयेमेमासमेकंचरंतिवै ॥ वसंतितेममपुरेयावत्कल्पःसमाप्यते ॥ १४ ॥ अपूज्यंपूजयेद्देवंसर्वकामफलंलभेत् ॥
गवार्चनंविप्रपूजांयःकरोतिमलिम्लुचे ॥ १५ ॥ तुलसीसेवनान्नृणामक्षय्यंस्वर्गमश्नुते ॥ सर्वान्कामानवाप्नोतिनात्रकार्याविचारणा ॥ १६ ॥
गंधर्वाप्सरसोयक्षपन्नगाश्चविहंगमाः ॥ मलमासजपुण्येनपापान्मुक्तादिवंगताः ॥ १७ ॥ अत्रार्थेयत्पुरावृत्तंतच्छृणुष्वसुमध्यमे ॥ स्नानाद
प्सरसाप्राप्तंफलंदुर्गतिनाशनम् ॥ १८ ॥ अप्सरारूपसंपन्नानाम्नास्मितविलासिनी ॥ धनदस्यप्रियानित्यमिंद्रलोकनिवासिनी ॥ १९ ॥
एकदाक्रीडनार्थायसखीभिःपरिवारिता ॥ स्वर्गलोकादिहप्राप्ताकुरुक्षेत्रमुपागता ॥ २० ॥ क्रीडित्वासुचिरंकालंपुष्पजातिंविचिन्वती ॥
गुंफितांकुसुमैर्मालांहस्तेधृत्वायथाब्रवीत् ॥ २१ ॥ ॥ अप्सराउवाच ॥ ॥ नमेसखिसमोभर्त्तायस्यकंठेसमर्प्यच ॥ तेनाहंनिवसाम्यत्रततः
सुखमवाप्नुयाम॥२२॥एवंवदंतीसातन्वीकामाक्रांतेनचेतसा॥तदातत्रसमायातोदुर्वासाःकोपनस्त्वृषिः ॥२३॥ ततःसर्वागताःसख्यस्तंदृष्ट्वाभय
विह्वलाः ॥ एकाकिनीस्थितामोहात्साचास्मितविलासिनी ॥२४॥ अविचार्यतयातस्यमालाकंठेसमर्पिता ॥ तदैवक्रोधभावेनशप्तासाऋषिणाध्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वम् ॥२५॥ पिशाचीवममांगेत्वंदुष्टेस्पृष्टासिकिल्बिषे ॥ तस्मान्मद्वचनाच्छापात्पिशाचीभवसत्वरम् ॥२६॥ ततःसारुदतीपादंगृहीत्वाकरुणाक
रम् ॥ उवाचदीनयावाचाकृतमेतत्क्षमस्वमे ॥ २७ ॥ अजानंत्याकृतमिदंकुरुष्वानुग्रहंमयि ॥ अपराधशतेनापिनस्त्रियंहंतिपंडिताः ॥ २८ ॥
दयांकुर्वंतिदीनेषुसाधवोदीनवत्सलाः ॥ इत्युक्तःसमुनिःप्राहप्रपन्नार्तिहरोयतः ॥२९॥ भविष्यसिपिशाचीत्वंयतोवाङ्नाहिमेमृषा ॥ चतुर्युग
सहस्रांतेपुनर्मद्वाक्ययोगतः ॥ ३० ॥ कुमार्यानामसुक्षेत्रेमहिसागरसंगमे ॥ काचित्तपस्विनीतत्रयाज्ञवल्क्यक्रमोद्भवा ॥३१॥ आयास्यतितपः
कर्तुमलमासेसमागते ॥ तत्रस्थास्यतिसाबालातापसीगुणशालिनी ॥ ३२ ॥ इत्थंतस्याःप्रकुर्वंत्यास्तपःपरमदुष्करम् ॥ अधिमासागमिष्यंति
महिसागरसंगमे ॥ ३३ ॥ अष्टोत्तरशतंतत्रस्नानदीपार्चनादिभिः ॥ उपवासेननक्तेनमौनेनायाचितेनच ॥ ३४ ॥ कदाचिद्दैवयोगेनकालपा
शनियंत्रिता ॥ क्षुत्तृड्भ्यांपीडितातत्रहाहाभूतेह्यनाश्रये ॥ ३५ ॥ द्वादश्यामसितायांचत्वंयास्यसिमलिम्लुचे ॥ दृष्ट्वातांमुक्तकामात्वंतस्याः
पार्श्वंगमिष्यसि ॥ ३६ ॥ तस्याःसंदर्शनादेवज्ञानमुत्पत्स्यतेतव ॥ वदिष्यसिशुभांवाणींतापसींतांसुवर्चसम् ॥ ३७ ॥ मातर्ममोपरि
कृपांकुरुदुःखौघनाशनम् ॥ नित्यंमृत्युर्वरंजंतोर्मापैशाच्यंक्षणंभवेत् ॥ ३८ ॥ श्रुत्वासातापसीदेवीत्वद्वाक्यंकरुणापरम् ॥ एकस्यैवाधि
मासस्यफलंतवप्रदास्यति ॥ ३९ ॥ तेनत्वंमुक्तशापासिमलमासफलेनवै ॥ गच्छयाहिसुखंभूमौमद्वाक्यात्पारमेष्यसि ॥ ४० ॥ ॥ कृष्ण
उवाच ॥ ॥ इत्थंसैवाप्सरालोकेमलमासप्रभावतः ॥ दुर्वाससापुराशप्तापुनर्मुक्तासुवाक्यतः ॥ ४१ ॥ मलमासफलंदेविवक्तुंकेनापिशक्यते ॥
अपिवक्त्रसहस्रैस्तुशेषोनाहंक्षमोविधिः ॥ ४२ ॥ सत्यंसत्यंपुनर्वाक्यंनादत्तमुपतिष्ठति ॥ तथासत्यंपुनर्जानेमलमासाधिकंनहि ॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वादृशीसमानारीनपुमान्सदृशोमम ॥ मलमाससमोनास्तिमासोब्रह्मांडगोलके ॥ ४४ ॥ पर्वतेषुयथामेरुर्ग्रहाणांचयथारविः ॥ सरि
त्सुचयथागंगागरुत्मांश्चपतत्रिषु ॥ ४५॥ नक्षत्राणांयथाचंद्रोगौर्वरिष्ठाचतुष्पदाम् ॥ मासानांमलमासोयंद्विपदांब्राह्मणोयथा ॥४६॥ मलमासे
कृतंसर्वंस्नानदानादिकंचयत् ॥ अक्षय्यंतद्भवेत्सर्वमाज्येनैवहुताशनः ॥ ४७ ॥ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येअप्सरोमोक्षोनामसप्त
दशोऽध्यायः ॥ १७॥ श्रीकृष्णउवाच ॥ मलिम्लुचेकृतस्येहस्नानानांत्रितयस्यच ॥ यत्फलंलभतेजंतुस्तद्वक्तुंकेनपार्यते ॥ १ ॥ सुखदंश्रीपदंदी
र्घजीवितव्यप्रदंतथा ॥ रोगघ्नंकीर्तिदंस्वर्गमोक्षदंक्रमतोयतः ॥ २ ॥ श्रीरुवाच ॥ भगवन्करुणाधीशकस्त्रिस्नानान्मलिम्लुचे ॥ अवाप
सद्गतिंतन्मेवक्तुमर्हसिकेशव ॥ ३ ॥ श्रीकृष्णउवाच ॥ शृणुदेविप्रवक्ष्यामिकथामाश्चर्यकारिणीम् ॥ मलिम्लुचस्यमासस्यकृतस्नानत्रय
स्यच ॥ ४ ॥ पुरादक्षिणदेशेतुप्रशस्तेगौतमीतटे ॥ प्रतिष्ठानपुरेरम्येचातुर्वर्ण्यसमाकुले ॥ ५ ॥ श्रुतिस्मृतिसदाचारयुक्तेपंडितमंडिते ॥ तत्र
कश्चिद्द्विजश्चासीद्वृद्धःसद्धर्मसंयुतः ॥ ६ ॥ नाम्नावैधर्मशर्मेतिसदाचारप्रियःसदा ॥ कुटुंबीबहुविद्याढ्योसतांमान्योमहामतिः ॥ ७ ॥ स्वधर्मंचर
तस्तस्यकदाचित्कालपर्यये ॥ मलिम्लुचेसमायातेमासेमेतिप्रियेप्रिये ॥ ८ ॥ महापुण्यप्रदःसर्वजंतूनांस्नानतोपिच ॥ द्विजेनतेनमनसिचिंतितं
किंकरोम्यहम् ॥ ९ ॥ वृद्धभावान्मयाशक्यंस्नानंकर्तुंननित्यशः ॥ परंदिनत्रयंस्नास्येमलमासेऽघनाशने ॥ १० ॥ इतिबुद्ध्यासमादायविधिना
नेनभामिनि ॥ प्रारब्धंस्नानमंतेहिमलमासदिनत्रये ॥ ११ ॥ एवंदिनद्वयंस्नानंगौतम्यांतेनवैकृतम् ॥ तृतीयेतुदिनेतेनप्रत्यूषेत्वरुणोदये ॥१२॥
स्नानार्थंसर्वसंभारान्गृहीत्वागौतमींप्रति ॥ गमनंकृतमागत्यमार्गेकोपिक्षुधाकुलः ॥ १३ ॥ क्रूरःप्रेतस्तुमिलितःसर्वतोधमनीयुतः ॥ शुष्कांगः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वतोधावन्हाहाकाररवाकुलः ॥ १४ ॥ एधत्स्थूणप्रतीकाशोरक्ताक्षोतिकृशोदरः ॥ सलोमापिंगलःपृष्ठेभीषणान्भीषयञ्जनान् ॥ १५ ॥ तंदृष्ट्वा
विकृतंभूतंधर्मशर्माद्विजोत्तमः ॥ उवाचवचनंसूक्ष्मंकोसित्वंभीमदर्शनः ॥ १६ ॥ सब्राह्मणवचःश्रुत्वादृष्टिपातंगतोपिहि ॥ पृष्ट्वाकिंचिज्ज्ञानभावं
विवेकःसमभूत्तदा ॥ १७ ॥ उवाचवचनंश्लक्ष्णंबद्धांजलिपुटःस्थितः ॥ विनयावनतोभूत्वाविप्रंनत्वाह्युवाचसः ॥ १८ ॥ ॥ प्रेतउवाच ॥ भगवन्
भूमिदेवेंद्रप्रेतोस्मिजनभीतिदः ॥ तवदृष्ट्यावचःश्रुत्वाकिंचिन्मेज्ञानमागतम् ॥ १९ ॥ विवेकोपिसमायातोदयांकुरुममोपरि ॥ स्वामिन्नस्मा
कमशनंनिंद्यंलालायितंबहु ॥ २० ॥ स्थानंनित्यंस्मशानादिकार्यंवापिदुरात्मनाम् ॥ लोकानांपीडनंछिद्रदर्शनेसतिभूसुर ॥ २१ ॥
संदर्शनंपुण्यदंचपापपुंजनिवारणम् ॥ जातंतन्मेद्यभवतोलप्स्येसौख्यमनुत्तमम् ॥ २२ ॥ तस्यैवंब्रुवतोदेविप्रेतस्योपर्यजायत ॥ ब्राह्मणस्यकृपा
दीनदयालोर्दीनभावदा ॥ २३ ॥ धृत्वाहृदिकृपांविप्रःप्रोवाचामुंपुनःप्रभुः ॥ केनपापेनतेप्रेतप्रेतत्वंप्राप्तमीदृशम् ॥ २४ ॥ वदचेद्यदिजानासिकीर
ष्येतत्प्रतिक्रियाम् ॥ इत्युक्तेवचनेप्रेतस्तंदृष्ट्वालब्धसंस्मृतिः ॥ २५ ॥ उवाचस्वमघंशंसन्विप्रस्याग्रेस्थितश्चसः ॥ शृणुस्वामिन्दयासिंधोपापंमे
बहुवर्तते ॥ २६ ॥ मयाचौर्यंबहुकृतंधर्षिताःपरदारकाः ॥ सुरातिसेविताविप्राघातिताश्चमयाविभो ॥ २७ ॥ एवमादीनिबहुधापापानितुकृतानिवै ॥
सहस्रशोमयाभुक्तायातनायमलोकजाः ॥ २८ ॥ परंपारस्तुनाद्यापिदृश्यतेतस्यवैनसः ॥ अथवादृश्यतेपारोयतस्त्वद्दर्शनंगतः ॥ २९ ॥ इत्युक्ते
वचनेतेनब्राह्मणःकरुणानिधिः ॥ करोमितेप्रतीकारंपापस्यचवचोब्रवीत् ॥ ३० ॥ इत्युक्त्वाजलमादायमलिम्लुचदिनत्रये ॥ यत्कृतंसवनंतस्य
पुण्यंतस्मैप्रदत्तवान् ॥ ३१ ॥ प्राप्तमात्रेपितत्पुण्येसप्रेतोदिव्यरूपधृक् ॥ नत्वास्तुत्वाद्विजंतंतुविमानवरमास्थितः ॥ ३२ ॥ अप्सरोगणसंकीर्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वभोगसमृद्धियुक् ॥ जगामदेवभुवनंद्विजवर्यप्रसादतः ॥ ३३ ॥ एवंमहापुण्यफलःसर्वपापप्रणाशनः ॥ स्नानादप्यधिकोमासोकिंपुनःश्रद्धया
कृतः ॥ ३४ ॥ इतिश्रीपद्मपुराणेमलमासमाहात्म्येप्रेतमोक्षोनामाऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ श्रीरुवाच ॥ ॥ श्रीकृष्णहृदयानंददेवदेवदया
निधे ॥ मलमासस्यमाहात्म्यंकथितंबहुविस्तरम् ॥ १ ॥ पुनःकथयतस्मिन्वैचीर्णेह्येकांतरेव्रते ॥ किंफलंजायतेकेनचीर्णंप्राप्ताचकादशा ॥
॥ श्रीकृष्णउवाच ॥ शृणुधर्मप्रियेदेविमलिम्लुचकृतेनयत् ॥ २ ॥ एकांतरोपवासेनफलंदैवतदुर्लभम् ॥ पुरामेरुगिरौदेशेविंध्य
पर्वतसंभवा ॥ ३ ॥ वर्ततेनिम्नगादिव्यासिद्धचारणसेविता ॥ शिवहस्तसमुद्भूतासाक्षाच्छिवइवापरा ॥ ४ ॥ स्मरणादपिसर्वेषांपापपंक
जभेदिनी ॥ नर्मदानामविख्याताऋषिसंघनिषेविता ॥ ५ ॥ तस्यास्तीरेपरेरम्येनानातरुविभूषिते ॥ हंसकारंडवाकीर्णेनानाकमलमालिनि
॥ ६ ॥ नगरंभृगुकच्छाख्यंविश्रुतंसुरपूजितम् ॥ त्वद्वासयोगतोयोग्यंमयानित्यंसमाश्रितम् ॥ ७ ॥ हरेणचभवान्याचदेवैरन्यैःसमाश्रितम् ॥
तत्रासीद्ब्राह्मणःकश्चिद्भृगुवंशसमुद्भवः ॥८॥ ज्योतिर्वित्सत्यवादीचसदाचारपरायणः ॥ नाम्नाकुशलशर्मासौभार्यातस्यकुशावती ॥९॥ तस्य
पालयतोधर्मंजातापुत्रीयशस्विनी ॥ नाम्नामेधावतीसाध्वीरूपिणीश्रीरिवापरा ॥ १० ॥ कस्मैचिद्द्विजमुख्यायदत्तासाप्राप्तयौवन ॥ केनाचि
त्कालयोगेनदैवयोगेनसासती ॥ ११ ॥ वैधव्यमगमत्स्त्रीणांदुःखदंमरणादपि ॥ तयाविचारितंपश्चादाचरामितथाव्रतम् ॥ १२ ॥नयेनजायते
दुःखंसंसारभ्रमणोद्भवम् ॥ इतिनिश्चित्यमनसिपितापृष्टस्तुकन्यया ॥१३॥ पित्रातस्यैतुकथितंव्रतंपुण्यतमंमहत् ॥ मलिम्लुचाख्यमासस्यसर्व
पापहरस्यवै ॥१४॥ एकांतरोपवासाख्यंसर्वदुःखनिवारणम् ॥ संसारतारकंदिव्यंव्रतानामुत्तमंव्रतम् ॥१५॥ तथातस्मिन्त्समायातेधिकेमासित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोधिकम् ॥ प्रातःस्नात्वानर्मदायांप्रारब्धंव्रतमुत्तमम् ॥ १६ ॥ मासंत्वयायुतंपूज्यब्राह्मणानभिपूज्यच ॥ भूशायिन्यासुवचसाहविर्भोजनशीलया
॥ १७ ॥ करुणापरयाजंतोर्नित्यंब्राह्मणसेवया ॥ सुवर्णदानपरयोपानद्दानवदान्यया ॥१८॥ उद्यापनविधिंसर्वंसदाकुर्वाणयाभृशम् ॥ तस्या
एवंप्रकुर्वंत्याबहवोधिगताःसमाः॥१९॥ मासामलिम्लुचाश्चैवसदाश्रद्धासमायुताः ॥ कस्यचित्वथकालस्यपर्यायेसाकृशासती ॥ २० ॥ जहौ
प्राणाञ्जलेष्वेवसदाशंकरकिंकरैः ॥ नीताशंभुपुरंदिव्यंदेव्याश्चात्यंतवल्लभा ॥२१॥ तत्रभोगान्बहून्भुक्त्वाकालेनगिरिजातनौ ॥ लीनालोकसु
खार्थायपुनर्वाराणसीपुरि ॥ २२ ॥ जातादेवीविशालाक्षीदर्शनात्स्मरणादपि ॥ वंदनात्पूजनाद्वापिसर्वकामप्रदायिनी ॥ २३ ॥ आरोग्य
दायिनीचापिमोक्षदादेवतामयी ॥ एवंप्रभावंमन्मासपुण्यकंपुण्यसेविते ॥ २४ ॥ नक्तव्रतस्याचरणात्फलमेतत्प्रकीर्तितम् ॥ नक्तव्रतेनापि
तत्रतत्सखीसाहिकोमला ॥ २५ ॥ गताकैलासमचलंमलमासप्रभावतः ॥ सापिकाश्यांसमुद्भूतागौरीमंगलपूर्विका ॥ २६ ॥ लोकानांमंगलं
दत्तेदत्तेमोक्षंसुमंगलम् ॥ गौरीशंकरसंयोगाद्गौरीशंकररूपतः ॥ २७ ॥ एवंज्ञात्वानरैर्देविनारीभिर्वापिबालकैः ॥ वृद्धैश्चयुवभिःकार्यमलिने
स्नानमुत्तमम् ॥ २८ ॥ मन्मासप्रभवंपुण्यंवक्तुंशक्यंनवेधसा ॥ चतुर्भिर्वदनैर्देविपंचभिर्वाशिवेनच ॥ २९ ॥ नमयाशेषसंज्ञेनसहस्रैर्वदनै
रपि ॥ किंबहूक्तेनदेवेशिमलमासोर्तिनाशनः ॥ ३० ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येएकांतरव्रतफलंनामैकोनविंशोऽध्यायः ॥ १९ ॥
श्रीरुवाच ॥ पुनःकथयमेकिंचिदाश्चर्यंमलमासजम्॥श्रीमन्नमृतसंवादिवचनंतृप्तिरस्तिन ॥१॥ श्रीकृष्णउवाच ॥ शृणुदेविमहाश्चर्यंपुराजातं
मरुस्थले ॥ प्रभावान्मलमासस्यफलहेतुर्महात्मनः॥२॥शतानिसप्तप्रेतानांमुक्तानिक्षणमात्रतः॥ तत्तेहंकथयिष्यामिमलिम्लुचफलंमहत्॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुसिंधौ तु नगरी वर्तते बहुविस्तरा ॥ नाम्नाशिवपुरीख्याताशिवस्यातिप्रियासदा ॥ ४ ॥ गोकर्णस्यगिरेःपार्श्वेप्रासादाट्टालभूषिता ॥
बह्वाश्चर्यवतीरम्यारम्यचत्वरशोभिता ॥ ५ ॥ नानाब्राह्मणसंयुक्ताक्षात्रियैश्चविराजिता ॥ वैश्यैःशूद्रैस्तथान्यैश्चसंयुक्तासत्यवादिभिः ॥ ६ ॥
श्रौतस्मार्तसदाचारप्राप्तकर्मकरैर्वरैः ॥ श्रुतिघोषसमाकीर्णासर्वशास्त्रवरावृता ॥ ७ ॥ तस्यामासीत्सदाचारःशूद्रःकश्चिद्धरोगृही ॥ नाम्नापि
विप्रदासोसौकर्मणापितथाविधः ॥ ८ ॥ तस्यपत्नीविप्रदासीसानाम्नाशुभलक्षणा ॥ साध्वीपतिपरापत्युराज्ञासन्निरतासदा ॥ ९ ॥ कस्यचि
त्त्वथकालस्यपर्यायेमालिनाभिधः ॥ मासःसमागतोदेविममप्रियतमोभृशम् ॥ १० ॥ तदातेनतुशूद्रेणसभार्येणद्विजाज्ञया ॥ स्नातु
मारब्धमाढ्येननित्यंदानपरेणच ॥ ११ ॥ गोकर्णगिरिमूलेतुसारणेश्वरसन्निधौ ॥ गोकर्णीवर्ततेगंगासर्वपापप्रणाशनी ॥ १२ ॥ स्मृतापि
तारयत्याशुसंसारंसर्वतःसताम् ॥ दुःखान्यघानिदैन्यंचसारणेशस्ततस्मृतः ॥१३॥ तस्यदेवस्यसान्निध्यंत्रिषुकुंडेषुसंस्थितम् ॥ तत्रागतानां
लोकानामनुग्रहकरीशिवा ॥ १४ ॥ प्रियार्थंदेवदेवस्यशंकरस्यमहानदी ॥ तत्रस्थास्यंतियेतेषामाधिव्याधिर्विनश्यति ॥ १५ ॥ तस्यांनद्यां
सुवंद्यायांस्नानंकृतवतःसतः ॥ विप्रदासस्यशूद्रस्यसभार्यस्यवरानने ॥ १६ ॥ शिवंपूजयतोनित्यंसमासःपूर्णतांगतः ॥ उद्यापनंयथाशास्त्रं
कृतंतेनविजानता ॥ १७ ॥ सन्निधौश्रीमहेशस्यगोकर्णतटवासिनः ॥ विधायोद्यापनंसर्वान्द्विजान्सपरितोष्यच ॥ १८ ॥ सपत्नीकान्स
दाचारान्न्यायमार्गानुसारिणः ॥ क्षमाप्यैवंविसृज्यैतान्यावदायातिमंदिरम् ॥ १९ ॥ तावन्मार्गेमहारौद्रान्प्रेतान्देविददर्शसः ॥ कालयोगे
नपापस्यपारंप्राप्ताञ्शुभोदयान् ॥ २० ॥ साधुदर्शनसंजातज्ञानलेशान्महाबलान् ॥ निवृत्तक्रूरभावांश्चपरहिंसापराङ्मुखान् ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषुकेचित्करालास्याःशुचिमेषनिभाःपरे ॥ इतरेमंदगमनाःपरेमुरजमध्यमाः ॥ २२ ॥ अतिक्षीणोदराश्चान्येनानाकारेणभीषणाः ॥ हाहाची
त्कारफूत्काराःसर्वेसाहसकारिणः ॥ २३ ॥ दुर्दर्शदग्धवृक्षाभान्गर्ताक्षान्पिंगमूर्धजान् ॥ तान्दृष्ट्वातस्यपत्नीचत्रस्तानेत्रेनिमील्यच ॥ २४ ॥
लतागृहंप्रविष्टाचशिवंसंस्मृतवत्यपि ॥ तस्थौस्वस्थःसशूद्रस्तुकेयूयमितिचाब्रवीत् ॥ २५ ॥ तंनत्वाप्रेतराजस्तुनाम्नावह्निशिखांगजः ॥ उवा
चवचनंसाधुसाधुशूद्रवरोत्तम ॥ २६ ॥ अस्माकंभाग्ययोगेनविधिनात्वंप्रदर्शितः ॥ तवदर्शनमात्रेणसर्वेषांनोह्यघंगतम् ॥ २७ ॥ किं
चिज्ज्ञानंसमायातमतस्त्वांप्रार्थयामहे ॥ निंद्याहारावयंसर्वेनिंद्यकर्मकराःसदा ॥ २८ ॥ अनेकविधपापानांकर्तारोसुखसंयुताः ॥ शतानिस
प्तसंख्याकाभ्रमंतोमरुमंडले ॥ २९ ॥ तृषाक्षुधातुराःसर्वेकर्मपाशैःसुयंत्रिताः ॥ वर्तामहेमहाभागकुरुष्वास्मासुवैदयाम् ॥ ३० ॥ मोचया
स्मान्महापापात्साधवोदीनवत्सलाः ॥ इत्युक्तेवचनेसाध्वितेनप्रेतेनसादरम् ॥ ३१ मलिम्लुचकृतस्नानसप्तकस्यफलंददौ ॥ सर्वेभ्योमुक्तये
दत्तेतस्मिंस्तत्क्षणमेवते ॥ ३२ ॥ प्रेतभावंपरित्यज्यदिव्यभावमुपागताः ॥ विमानान्यास्थिताःसर्वेस्वर्गंजग्मुरनुत्तमम् ॥ ३३ ॥ तंशूद्रंसं
स्तुवंतश्चनमंतश्चपुनःपुनः ॥ इत्थंमलिम्लुचकृतस्नानपुण्यमहोदयः ॥ ३४ ॥ तस्माद्यत्नेनकर्तव्यंस्नानंमासिमलिम्लुचे ॥ वर्ततेन्यान्यपि
शुभेमहाश्चर्याणिसुंदरि ॥ ३५ ॥ इतिश्रीपद्मपुराणेमलमासमाहात्म्येप्रेतमोक्षोनामविंशतितमोऽध्यायः ॥ २० ॥ ॥छ॥ ॥श्रीकृष्णउवाच॥
भूयएवप्रवक्ष्यामिशृणुसर्वांगसुंदरि ॥ मलिम्लुचकृतस्नानफलमद्भुतकारणम् ॥ १ ॥ सौराष्ट्रेसुजनेदेशेवृक्षच्छायाविवर्जिते ॥ तृणधान्याश
नोपेतेगवाविकसमाकुले ॥ २ ॥ षट्कांभीरगणोपेतेनगरग्रामशोभिते ॥ खेटखर्वटसंयुक्तेश्वखरौघसमन्विते ॥ ३ ॥ तत्रास्तिनगरंदिव्यंप्रभास

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिनामतः ॥ पुण्यंपुण्यजनाकीर्णंप्रासादापण्यपूरितम् ॥ ४ ॥ बहुचत्वरसंशोभिराजमार्गविराजितम् ॥ रथ्योपरथ्यासंवीतंदुर्गदुर्गदृढारणम्॥
॥ ५ ॥ तत्रासीद्ब्राह्मणःकश्चित्सोमशर्मागुणान्वितः ॥ वेदशास्त्रकृताभ्यासःसदाचारपरायणः ॥ ६ ॥ तेनेष्टंबहुभिर्यज्ञैर्दत्तंदानमनेकधा ॥ पूर्त
चापिकृतंनानातथासंराधितंबहु ॥ ७॥ स्नाताश्चबहवोमाघाअधिकाबहवःकृताः ॥ कदाचित्तस्यविप्रस्यस्नानंगतवतःशुभे ॥ ८॥ सरस्वत्या
स्तुसंयोगेसमुद्रस्यचशोभने ॥ मार्गेकश्चिद्घोररूपोराक्षसोदर्शनंययौ ॥ ९ ॥ महाकायोमहावीर्योपिंगोर्ध्वजटमूर्धजः ॥ करालास्योरक्तनेत्रो
लंबग्रीवोमहाहनुः ॥ १० ॥ गर्त्तोदरोधमनिकोवक्रभृकुटिभीषणः ॥ लंबोदरोमहाशौर्यःसदृक्कूर्चोदिगंबरः ॥ ११ ॥ व्यात्ताननोलल
ज्जिह्वोमहारावकरोविभीः ॥ पुरुषादोजीवघातीक्षुधापीडितविग्रहः ॥ १२ ॥ तंदृष्ट्वाब्राह्मणःकश्चिच्छ्रीनृसिंहंस्मरन्स्थितः ॥ राक्षसो
विस्मयाविष्टोग्रहीतुंतंतुनाशकत् ॥ १३ ॥ जाज्वल्यमानंतपसादृष्ट्वाग्निमिवदारुणम् ॥ उवाचवचनंचापिविवेकगतदुर्मतिः ॥ १४ ॥
साधूदितसमायोगाद्योगादिवसनातनात् ॥ विप्रेंद्रस्त्वमधृष्योसितेजसाग्निरिवज्वलन् ॥ १५ ॥ बहुपापवतोमेद्यभवान्साधुः
समागतः ॥ असाधुराक्षसत्वेपिभवद्दर्शनसंगमः ॥ १६ ॥ मांमोचयदयासिंधोदीनबंधोद्यदुर्गतेः ॥ इतिवाक्यंसमाकर्ण्यराक्षस
स्यचसद्विजः ॥ १७ ॥ तर्कयामासमनसिधर्मतत्त्वंदयानिधिः ॥ यद्यहंभर्त्सयिष्यामिगमिष्यत्ययमन्यतः ॥ १८ ॥ परामन्यांबहु
विधांहिंसांदुष्टःकरिष्यति ॥ यद्येनंमोचयिष्यामितन्मेधर्मोमहानयम् ॥ १९ ॥ भविष्यतिदयारूपोबहूपकृतिकारकः ॥ विचार्येत्थं
जलंकृत्वाकर्णिकायाःकरेभुवि ॥ २० ॥ मलिम्लुचेकृतस्नानादेकवारंद्विजोददौ ॥ तस्मैपापिष्ठरूपायसुपुण्यंपुण्यभोगवान् ॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्पुण्येनतुसद्योसौदिव्यरूपधरोबभौ ॥ द्विजोपरिसुरैर्मुक्तापुष्पवृष्टिःपपातह ॥ २२ ॥ साधुसाध्वितितंदेवास्तुष्टुर्द्विजपुंगवम् ॥ महारक्षःप्रमोक्षेणजंतूनामुपकारकः ॥ २३ ॥ ततस्तंसुरसंवासेदेवयानेचशोभने ॥ किंकिणीगणसंकीर्णेदिव्यनारीपरिष्कृते ॥ २४ ॥ नानाभोगविभोगाढ्येरम्यपक्षिरवावृते ॥ निवेशयित्वानिर्जग्मुःस्वर्गंपुण्यनिवेशितम् ॥ २५ ॥ संगीयमानंगंधर्वैरप्सरोभिःपृथक्पृथक् ॥ रणद्वलयहस्ताभिर्वीज्यमानःसुचामरैः ॥ २६ ॥ नत्वास्तुत्वातुतंविप्रंजगामत्रिदशालयम् ॥ एवंदेविफलंस्नानेधिकेमासिभवेत्प्रिये ॥ २७ ॥ तस्मान्मानुष्यमासाद्यनस्नानमधिकेचरेत् ॥ तस्यामृतंकरान्नष्टंप्रमादात्प्रगतंप्रिये ॥ २८ ॥ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येराक्षसमोक्षोनामैकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ श्रीरुवाच ॥ भगवन्भजनासक्तंमानसंममसांप्रतम् ॥ मलिम्लुचेमहामासेनितरांतववल्लभे ॥ १ ॥ वदब्राह्मणसेवायाःफलंकिंस्याद्दयानिधे ॥ तत्सेवयाकस्यपुनःसंजातंसम्यगीहितम् ॥ २ ॥ श्रीकृष्णउवाच ॥ शृणुसुंदरिवक्ष्यामिद्विजसेवामहोदयम् ॥ इतिहासंमहापुण्यंदुःखदारिद्र्यनाशनम् ॥ ३ ॥ अस्तिदेशोविराटाख्योमहाधनजनावृतः ॥ पुण्यवज्जनपुण्यात्मापुण्यतीर्थशतावृतः ॥ ४ ॥ नदुर्भिक्षंकदाप्यस्मिन्कस्यचित्पुण्ययोगतः ॥ राजवर्यस्यदेवस्यवरदानप्रभावतः ॥ ५ ॥ तस्मिन्देशेमहाद्रेस्तुसह्याख्यस्यसमीपतः ॥ महापुराख्यंनगरंवर्ततेदेवदुर्लभम् ॥ ६ ॥ यत्रधर्मश्चतुष्पादःकलावपिभविष्यति ॥ यत्रवर्णास्तुचत्वारःस्वधर्मपरिचारिणः ॥ ७ ॥ यत्रदेवीरेणुकाख्यारामस्यजननीशुभा ॥ सर्वकामप्रदासाध्वीब्रह्माद्याखिलवंदिता ॥ ८ ॥ यत्रदेवाश्चऋषयोयत्रसाक्षान्महेश्वरः ॥ यत्रश्रीगौतमीगंगावृद्धापोष्यानदी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गता ॥ ९ ॥ प्रणीतासामहापुण्याब्रह्मणोयज्ञपात्रजा ॥ तत्रासीत्पादजोवर्णोमहाशूद्रइतीरितः ॥ १० ॥ नाम्नातुधनदासाख्यः
स्वधर्मपरिपालकः ॥ सर्वभावेनविप्राणांसेवांसकुरुतेसदा ॥ ११ ॥ दासेषुविद्यमानेषुस्वस्यगर्वंविहायच ॥ पादप्रक्षालनंचक्रे
द्विजांगणविभेदनम् ॥ १२ ॥ मार्जयित्वापिसंस्कारंचित्रस्वस्तिकभूषणम् ॥ वस्त्रप्रक्षालनंकर्मविक्रयंक्रयमेवच ॥ १३ ॥ पादसं
वाहनंचैवस्नानंचाभ्यंगपूर्वकम् ॥ विप्रस्त्रीणांचयःसेवांस्वस्त्रीद्वाराचकारह ॥ १४ ॥ धनेनापिस्वकीयेनविप्रकार्याणिसर्वदा ॥ चकार
कपटंत्यक्त्वापूर्वपुण्यप्रभावतः ॥ १५ ॥ मलमासेविशेषेणस्नानदानदयापरः ॥ सजातोदैवयोगेनकुष्ठीकुत्सितदेहवान् ॥ १६ ॥
तस्यपत्नीचखंजाक्षीनाम्नामानवतीशुभा ॥ धनदासस्यशूद्रस्यचिंतामनसिजायते ॥ १७ ॥ एवंचिंतयतस्तस्यकदाचित्काल
पर्यये ॥ सिद्धेनागत्यकथितंश्वस्तेमृत्युर्भविष्यति ॥ १८ ॥ सदारस्यद्विजानांतुप्रसादात्त्वंस्वभार्यया ॥ स्वर्गंगमिष्यसिक्षिप्रंविमानव
रमास्थितः ॥ १९ ॥ इतिश्रुत्वावचस्तस्यधनंतेनत्रिधाकृतम् ॥ दत्तःपुत्रायएकोंशःपुत्रीभ्यामपरोर्पितः ॥ २० ॥ तृतीयोद्विजसात्कृ
त्वातीर्थेगत्वार्पितस्तथा ॥ धनकोटिंविभज्यैवंकृतकृत्यस्ततोभवत् ॥ २१ ॥ एवंद्विजानांशुश्रूषाइहलोकेपरत्रच ॥ सर्वकामप्रदामोक्ष
साधिकाशूद्रजेष्वपि ॥ २२ ॥ एवंकुर्वंतिसद्भक्तिंमलमासेतुयेनराः ॥ नारीवामुच्यतेपापान्नगर्भंप्रविशंतिते ॥ २३ ॥ ॥ इति
श्रीपद्मपुराणेमलमासमाहात्म्येद्विजसेवावर्णनंनामद्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ छ ॥ श्रीरुवाच ॥ ॥ दामोदरदया
सिंधोवददानफलाफलम् ॥ मलिम्लुचेविशेषेणकैःकैःकिंकिंफलंव्रतम् ॥ १ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुसुंदरिवक्ष्यामिलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानुग्रहहेतवे ॥ प्रविधानंतुदानानांफलानिमममासके ॥ २ ॥ योवैमलिम्लुचेमासिहिरण्यंशक्तिमात्रकम् ॥ ददातिद्विजमुख्यायसप्राप्नो
तिसमीहितम् ॥ ३ ॥ सुवर्णंहिसुवर्णायसुवर्णमिवमंदिरे ॥ सुवर्णायचयोदद्यान्नचशोच्यःकदाचन ॥ ४ ॥ सुवर्णंसुद्विजेदत्तेवह्निस्तु
ष्यतिदैवतैः ॥ तस्मिंस्तुष्टेभवेद्देविदारिद्र्यंनैवजन्मनि ॥ ५ ॥ गोदानेनभवेल्लोकोगवांलोमाभिसंख्यया ॥ कल्पांतंब्रह्मणोलोकोभवे
त्पापप्रणाशनः ॥ ६ ॥ नित्यदानंसदादेयंहिरण्यादिमलिम्लुचे ॥ तेनदानप्रभावेनब्रह्मलोकमवाप्नुयात् ॥ ७ ॥ रजतंश्रद्धयोपे
तोद्विजेयोवितरत्यणु ॥ पितरस्तस्यसंतुष्टाभवंतिनिखिलेष्टदाः ॥ ८ ॥ ताम्रंवाताम्रपात्रंवायोददातिमलिम्लुचे ॥ श्रीरुद्रःसर्वदस्त
स्यरुद्राणीसहितोभवेत् ॥ ९ ॥ पद्मरागादिरत्नानांदानाद्भवतिभूपतिः ॥ मुक्तादानंविशेषेणभुक्तिमुक्तिप्रदायकम् ॥ १० ॥
वस्त्रदश्चंद्रसालोक्यमाविकंपापनाशनम् ॥ और्णिकंचमहामूल्यंवस्त्रंदत्तंभयापहम् ॥ ११ ॥ यथाकालोपयोगायवस्त्राद्यमुपका
रकम् ॥ तद्दानंविविधाँल्लोकान्ददात्येवनसंशयः ॥ १२ ॥ धान्यदानंमहादानंसदादेयंद्विजातये ॥ प्रीतयेवासुदेवस्यममस
र्वार्थसाधनम् ॥ १३ ॥ अन्नमन्नार्थिनेदेयंजलंजलजलोचने ॥ जलार्थिनेसदादेयंतत्पुण्यमक्षयंभवेत् ॥ १४ ॥ उपानहौतुयैर्दत्तै
र्द्विजेश्रद्धापुरःसरम् ॥ तेषांनयातनायामीमार्गोयातिसुखावहः ॥ १५ ॥ घृतंवाघृतपात्रंवासूर्यलोकसुखप्रदम् ॥ तिलपात्रप्रदानेन
रुद्रलोकेमहीयते ॥ १६ ॥ योवार्षिकंशुभंधान्यंघृतादिरससंयुतम् ॥ वस्त्राभरणसंयुक्तंपूज्यमांसमहेश्वरम् ॥ १७ ॥ सपत्नीकंद्विजं
चैवपूजयित्वासदक्षिणम् ॥ ददातिमत्प्रियेमासिद्वादश्यांतुविशेषतः ॥ १८ ॥ कृतकृत्योभवेन्मर्त्योनात्रकार्याविचारणा ॥ येनकेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्युपायेनशक्तेनाशक्तकेनवा ॥ १९ ॥ घृतंतुश्रद्धयादेयंद्विजायहितमिच्छता ॥ घृतदानात्परंदानंपृथिव्यांनैवविद्यते ॥ २० ॥ सप्तधान्यं
द्विजेदेयंसहदक्षिणयाशुभे ॥ तेनसप्तर्षिणांलोकेपूज्यतेनात्रसंशयः ॥ २१ ॥ व्रीहयश्चयवाश्चैवगोधूमाश्चप्रियंगवः ॥ मुद्गामाषास्ति
लाश्चैवसप्तधान्यंप्रकीर्तितम् ॥ २२ ॥ तिलाःकृष्णास्तिलाःश्वेतास्तिलागोमूत्रसन्निभाः ॥ तिलाममप्रियानित्यंसर्वदेवप्रियास्तिलाः ॥ २३ ॥
तिलदानंसदाकार्यंमन्मासेतुविशेषतः ॥ सहेमतिलदानंतुसर्वाभीष्टप्रदायकम् ॥ २४ ॥ मोदकान्घनकर्पूरसिताखाद्यविनिर्मितान् ॥
मधुराज्यविशिष्टांस्तुबालाप्तजनमोदकान् ॥ २५ ॥ योददात्यधिकेमासिस्नात्वामत्तुष्टयेनरः ॥ तस्मैतुष्टोभविष्यामिप्रियेनैवात्रसं
शयः ॥ २६ ॥ नानावसुसमुद्भूतान्मोदकान्सुमनोहरान् ॥ मत्प्रीत्यर्थंतुमन्मासिमधुरानघृतपाचितान् ॥ २७ ॥ द्विजातिभ्यःप्रद
त्त्वातुममलोकेमहीयते ॥ नविघ्नस्तस्यकार्येषुकदाचिदपिजायते ॥ २८ ॥ किंबहूक्तेनदेवेशिसत्कर्मास्तिपरंनहि ॥ दानाद्भूर्लोकसं
साध्यात्तस्माद्दानंसमाचरेत् ॥ २९ ॥ दानेनदेवावशगाःकिमुमानुष्यकोजनः ॥ दानेनकीर्तिर्भवतिलोकेचात्रपरत्रच ॥ ३० ॥ दानेनध
नधान्याप्तिश्चतुर्वर्गसमागमः ॥ दानेनपापनाशश्चरोगनाशश्चदानतः ॥ ३१ ॥ दानेनवांछितावाप्तिर्दानात्पुत्रप्रपौत्रकाः ॥ तस्माद्दानंस
दादेयंमलमासेविशेषतः ॥ ३२ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येनानादानप्रशंसानामत्रयोविंशतितमोऽध्यायः ॥ २३ ॥
॥ श्रीकृष्णउवाच ॥ शृणुसुश्रोणिवक्ष्यामिफलंयन्मलमासजम् ॥ सर्वदासर्वदानोत्थंफलंप्राप्नोतिमानवः ॥ १ ॥ सर्वव्रताधिकोमासःसर्व
दानाधिकोमतः ॥ सर्वेषामेवमासानामयमेवाधिकोमतः ॥ २ ॥ स्नानंदानंजपोहोमःस्वाध्यायोहरितोषणम् ॥ स्नानेनाथव्रतेनाथदीपदाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवापुनः ॥ पूजनेनतुविप्रस्यतथागोपूजनेनच ॥ ३ ॥ येनकेनाप्युपायेनमासेऽस्मिन्व्रतमुत्तमम् ॥ व्याजनीपकृतेयननसपश्यतिभा
स्करिम् ॥ ४ ॥ शुष्कार्द्रपातकंघोरंपापसगंसमुद्भवम् ॥ संप्राप्तेमलमासेतुतत्सर्वंयातिभस्मसात् ॥ ५ ॥ मलमाससमुत्थेनवह्नि
नापातकेंधनम् ॥ भस्मसात्तद्भवेद्देविअपिजन्मशतोद्भवम् ॥ ६ ॥ नेदृशंपावनांकिंचिन्नराणांभूतिमिच्छताम् ॥ यादृशोमलमासोयंपु
रुषोत्तमवल्लभः ॥ ७ ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ अधिमासादिनैकस्यकलांनार्हतिषोडशीम् ॥ ८ ॥ नगंगानगयादेवि
नकांचीनचपुष्करम् ॥ नचापिकौरवंक्षेत्रंनरेवानमहीशिवा ॥ ९ ॥ यमुनाचंद्रभागाचनतुल्यामलमासके ॥ अनायासेनदेवेशिप्राप्य
तेवैष्णवंपदम् ॥ १० ॥ असंक्रांतेसमायातेमासिवैपुरुषोत्तमे ॥ येकुर्वंतिनराःस्नानंतैःप्राप्तंजन्मनःफलम् ॥ ११ ॥ उपवासपरोभू
यात्पूजयेत्पुरुषोत्तमम् ॥ विमुच्यसर्वपापेभ्योवसेद्वैकुंठसन्निधौ ॥ १२ ॥ नदृष्टंत्रिषुलोकेषुव्रतमेतत्सुदुर्लभम् ॥ अज्ञानाज्ज्ञानतोची
र्णंचतुर्वर्गफलप्रदम् ॥ १३ ॥ तावत्पापानिगर्जंतितावद्भूतानिभूतले ॥ तावच्चयातनायामीयावद्रोमलिम्लुचः ॥ १४ ॥ यथाबीजा
निभूभागेवापितानिभवंतिच ॥ अमृताख्यायथावल्लीयथादूर्वादलंभुवि ॥ १५ ॥ वर्धतेतद्वदेवेदंकुरुतेसत्फलंमले ॥ तस्मात्सर्वात्म
नाशक्त्यामलमासव्रतंचरेत् ॥ १६ ॥ श्रीरुवाच ॥ मलमासव्रतस्याथयथाशक्तिकृतस्यच ॥ यत्फलंजायतेदेवतदेवकथयस्वमे ॥ १७ ॥
कृष्णउवाच ॥ अत्रार्थेकथयिष्यामिचेतिहासंपुरातनम् ॥ अरुंधत्याश्चपार्वत्याःसंवादमतिसुंदरम् ॥ १८ ॥ अरुंधत्युवाच ॥ सर्वे
ष्वपिहिमासेषुव्रतानिकथितानिमे ॥ अधिमासेचसंप्राप्तेकिंकार्यंगौरितद्वद ॥ १९ ॥ पार्वत्युवाच ॥ शृणुसाध्विपुरावृत्तमधिमासव्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंप्रति ॥ समक्षंममदेवस्यमातामममयथाब्रवीत् ॥ २० ॥ एकदामेनयामात्रास्नेहाद्वात्सल्यभावतः ॥ ममोक्तंपुत्रिमत्तस्त्वमुत्पन्नाच
सुलोचने ॥ २१ ॥ ख्यातात्रिजगतांमध्येत्वयाख्यातंचराचरम् ॥ ममचातिप्रियाकिंतुमयालभ्यंनतेंतिके ॥ २२ ॥ अहंगृहांतरेख्यातात्वंतु
विश्वांतरेउमे ॥ एकोपियत्रनामापिनवेत्तिकमलानने ॥ २३ ॥ यत्रतत्रस्थितावापित्वंब्रह्मादिभिरीड्यसे ॥ मासाःपक्षाश्चपर्वाणिदिनानितव
सुंदरि ॥ २४ ॥ व्रतैर्व्याप्तानिव्रतिभिरेवंत्वंपूज्यसेनरैः ॥ अप्येकपुष्पंमेमूर्ध्निनचाध्यारोपयेज्जनः ॥ २५ ॥ पंचषष्ट्यधिकंवर्षंदिनानांचश
तत्रयम् ॥ मद्धियार्धघटीनास्तिभाग्यंयोग्यंजगत्त्रये ॥ २६ ॥ पार्वत्युवाच ॥ अरुंधतियदामात्राएवंस्नेहेनवर्जिता ॥ भर्तुःसमीपेवात्सल्या
द्विनोदेनावभाषणात् ॥ २७ ॥ स्मितंकृत्वामयातत्रमेनाप्रोक्तागुणार्थिनी ॥ ॥ उमोवाच ॥ ॥ मेनकेमातरेवंत्वंकस्माद्ब्रूषेत्यमर्षणम् ॥
॥२८॥ मलमासेपिमांकोपिनहिपूजयतिक्वचित् ॥ अन्याश्चापिक्रियाःसर्वानिवर्ततेसुधार्मिके ॥२९॥ तस्मादत्राहंमेनेत्वांपूजयिष्यामिसुव्रते ॥
इत्युवाचाधिकेमासिव्रतंचाधिकृतंमया॥३०॥ ॥ अरुंधत्युवाच ॥ ॥ शिवप्रियेममत्वंवैव्रतंप्रब्रूहिपार्वति ॥ नासौनिरर्थकोमासोममात्रनियमः
कथम् ॥ ३१ ॥ ॥ पार्वत्युवाच ॥ ॥ यदायदाधिमासः स्यादसंक्रांतोमुनिप्रिये ॥ तदातदाव्रतंकार्यंतथ्यंतत्तेवदाम्यहम् ॥ ३२ ॥ अयं
मासोमयादत्तोमेनायाः ख्यातिकारणात् ॥ मासस्यादौतृतीयायांसितायांशुभ्रवस्त्रधृक् ॥ ३३ ॥ नारीवाथनरोवापिगृह्णीयान्नियमव्रतम् ॥
गुरोरादेशमासाद्यपूर्वाह्णेसंयतेंद्रियः ॥३४॥ ब्रह्मवृक्षासनेस्थाप्यपंचस्मरफलानिच ॥ मधूच्छिष्टेनकर्तव्यामेनातदुपरिस्वसः॥३५॥गजस्कंधस
मारूढापतिपुत्रसमन्विता ॥ गौरीपंचकसंयुक्तासर्वाभरणभूषिता ॥ ३६ ॥ प्रतिष्ठाप्याद्विजैस्तांचपूजयेन्मममातरम् ॥ विधिनावस्त्रपुष्पाद्यैर्धू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पैरर्घनिवेदनैः ॥ ३७ ॥ नीराजनैश्चदीपैश्चयथाप्राप्तैररुंधति ॥ एवंतुसकलंमासंपूजयेद्दीपकंदहेत् ॥ ३८ ॥ एकभुक्तंचकर्तव्यंयावन्मासःसमा
प्यते ॥ अथारंभेविसर्गेचअशक्त्यावापिकारयेत् ॥ ३९ ॥ मासांतेमेनकाख्यांचहैमींकृत्वाप्रपूज्यच ॥ दद्याद्विप्रायविधिवन्मातरंचार्चयेत्स्व
यम् ॥ ४० ॥ वस्त्रपल्लवतांबूलैःकुसुमैःफलपुष्पकैः ॥ खर्जूरैःकंचुकैश्चापिपूजयेद्विप्रपंचकम् ॥ ४१ ॥ भोजयेच्चसपत्नीकान्स्वशक्त्यापरिधाप
येत् ॥ एवंकृत्वाविधानेनव्रतंचैवमलिम्लुचे ॥ ४२ ॥ सुखसौभाग्यसंतानंनारीप्राप्नोत्यरुंधति ॥ ममानंदकरंह्येतत्कर्तव्यंव्रतमुत्तमम् ॥ ४३ ॥
इति श्रीपद्मपुराणेमलमासमाहात्म्येमेनकाख्यव्रतकथनंनामचतुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुदे
विप्रवक्ष्यामिमलमासव्रतंमहत् ॥ यच्छ्रुत्वामानवोभक्त्यामुच्यतेयोनिसंकटात् ॥ १ ॥ अत्रतेकथयिष्यामिकथांपापप्रणाशिनीम् ॥ यांश्रुत्वा
ब्रह्महास्त्येनोमुच्यतेयोनिसंकटात् ॥२॥ वीरबाहुर्नृपःपूर्वमासीद्भूमितलेखिले ॥ दातायज्वासुरूपश्चसुभगोजनवल्लभः ॥ ३ ॥ क्षमावान्बलवां
श्चैवसर्वैर्नृपगुणान्वितः ॥ तस्यभार्यासुरूपावैनाम्नाख्यातायशोमती ॥ ४ ॥ धनयौवनगर्विष्ठासाभिमानवतीसती ॥ तस्यभूमिपतेरासीन्मंड
नःसचिवःसदा ॥ ५ ॥ स्वामिभक्तिःश्रियायुक्तःसशूरःसचिवाग्रणीः ॥ तस्यभार्यागुणवतीसतीकुलशिरोमणिः ॥ ६ ॥ वीरबाहुःसुखंभुंक्तेय
शोमत्यासमन्वितः ॥ सचिवेन्यस्यभूभारंसंसारफलमल्पधीः ॥ ७ ॥ साराज्यपिचनोर्किंचित्कुरुतेचतथाल्पकम् ॥ नदानंनव्रतंवापिनदेवा
र्चनसेवनम् ॥ ८ ॥ तयोःपुत्रद्वयंजातंकालेनबहुनाप्रिये ॥ सुबाहुःशतबाहुश्चरूपयौवनसंयुतौ ॥ ९ ॥ एकदामलमासेतुसंप्राप्तेमंडनाप्रिया ॥
जगामराजभवनंसेवायांचयशोमतीम् ॥ १० ॥ सादृष्ट्वाराजभवनंधनरत्नविभूषितम् ॥ दासदासीजनाकीर्णंसदास्वर्गपुरोपमम् ॥ ११ ॥ वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृश्यहृदिपुण्यस्यप्रोक्तंतस्याखिलंफलम् ॥ भज्यतेसहसख्यावैकेवलंनाज्यतेपुनः ॥ १२ ॥ इतिसंचिंत्यसुचिरंपरोपकृतिहेतवे ॥ यशोमतीं
गुणवतींप्राहसाहसिकंवचः ॥ १३ ॥ ध्यात्वामनसिसद्भावंसखिरूपंविलोक्यच ॥ गुणवत्युवाच ॥ यशोमतिशृणुष्वेदंवचनंममानदे ॥
॥ १४ ॥ अधिमासव्रतंदेविकुरुष्वविधिपूर्वकम् ॥ तदवज्ञायवचनंयशोमत्यापिभामिनी ॥ १५ ॥ उवाचसस्मितंवाक्यंशृणुमेवचनंसखि ॥
यत्प्रजाभिःकृतंपुण्यंतीर्थयात्राव्रतादिकम् ॥ १६ ॥ राजातदंशभागीस्यात्तद्योगादहमप्यथ ॥ किंव्रतेनविशालाक्षीस्वशरीरविशोषणात ॥
॥ १७ ॥ तपसाब्रह्मचर्येणदत्तमेवोपभुज्यते ॥ इत्युक्त्वागृहकार्याणिकारयामासभामिनी ॥ १८ ॥ संतोष्यवचनैःसातुविससर्जयशोमतीम् ॥
व्रतंचक्रेगुणवतीविधिवन्मलमासके ॥ १९ ॥ व्रतलोपेनदेवेशियशोमत्याःसुतौमृतौ ॥ परमज्वरपीडार्तौसुयौवनधरौप्रिये ॥ २० ॥ तद्दुःखदुः
खिताराज्ञीविललापाकुलेक्षणा ॥ लुलुठेभूतलेत्यंतशोकसंविग्नमानसा ॥ २१ ॥ राजापिविललापार्तःसर्वलोकसमन्वितः ॥ प्रबोधितोबहुवि
धामंडनाख्येनधीमता ॥ २२ ॥ अज्ञानावृतहृदयोनबुबोधतथापिसः ॥ मलमासव्रतावज्ञाकृताज्जातंफलंतयोः ॥ २३ ॥ इति श्री
पद्मपुराणेमलमासमाहात्म्येस्नानादिव्रतयोगेराजशोकोनामपंचविंशोऽध्यायः ॥ २५ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ तदिदंसहसाजातं
दुःखोद्वेगसमाकुलम् ॥ मंडनस्यप्रियाश्रुत्वाशोकतप्तासमागता ॥ १ ॥ उभेरुरुदतुःसख्यौपुत्रशोकाकुलेक्षणौ ॥ वारयामासुरन्याया
दास्यस्ताःसुविलोचनाः ॥ २ ॥ विलापांतेयशोमत्यागुणवत्यामुखंशुभम् ॥ कुंकुमांजनसिंदूरस्रक्तांबूलविभूषितम् ॥ ३ ॥ ददर्शोवाच
किमिदमकालेकारिमंडनम ॥ राज्युउवाच ॥ धृतमाभरणंवस्त्रंसख्येवंतवनोचितम् ॥ ४ ॥ उत्तिष्ठोत्तिष्ठगच्छत्वंगृहंगुणवतिस्वकम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभाग्यादेवचात्यंतंदुःखमेवोपभुज्यते ॥ ५ ॥ साभृशंप्रेषिताकांतंप्रत्युवाचगृहंगता ॥ नजानेप्राणनाथाहंसख्यासंप्रेषितागृहम् ॥ ६ ॥ महादुःखेपिपतितातद्विचारयवैप्रभो ॥ मंडनःप्राहतांपत्नींनकिंचिदपिभामिनि ॥ ७ ॥ प्रातर्गच्छप्रियेभद्रेप्रतिबोधयतांसखीम् ॥ अहंनरपतेःपार्श्वंगच्छामिजनसंसदि ॥ ८ ॥ श्रीकृष्णउवाच ॥ इतिसंमंत्र्यतौदेविदंपतीप्रतिजग्मतुः ॥ उभयोःसन्निधौप्राप्तौपुत्रशोकापनुत्तये ॥ ९ ॥ राज्ञीतथाविधंदृष्ट्वागुणवत्यामुखंशुभम् ॥ कोपाकुलाजगादेदंदासीवक्त्रेणभूपतिम् ॥ १० ॥ राज्ञीप्रेमवशाद्राजातथागत्यनिरीक्ष्यच ॥ तदिदंनिखिलंसम्यगितिमत्वाचुकोपसः ॥ ११ ॥ मंडनंबंधयामासगुणवत्यासमंतदा ॥ सर्वंगृहगतंद्रव्यमानयामाससत्वरम् ॥ १२ ॥ कारागृहगतौकृत्वादंपतीतौरुषान्वितः ॥ नृपतिर्दयितायुक्तःपुनःपुनरतर्जयत् ॥ १३ ॥ मंडनःस्वांप्रियांप्राहप्रियेकिमिदमागतम् ॥ नजानेकर्मणःकस्यविपाकोयमुपस्थितः ॥ १४ ॥ ॥ गुणवत्युवाच ॥ ॥ देवसेवकवर्गस्यस्वाम्यायत्तंचजीवितम् ॥ कोपतःकोपनस्यास्यकाकथाक्रियतेवृथा ॥ १५ ॥ आवयोर्दुःखमुदधिंवारयिष्यतिकेवलम् ॥ विष्णुर्विश्वंभराभारधारणैकधुरंधरः ॥ १६ ॥ श्रीधरःपरमेशानःसर्वदुःखनिकृंतनः ॥ संसारेसाररूपश्चसर्वाभीष्टफलप्रदः ॥ १७ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ इत्युक्त्वापतिताभूमौलोहशृंखलयंत्रिता ॥ मंडनोपिचनिःश्वासपरमोविरतश्चसः ॥ १८ ॥ अत्रांतरेश्रीपतिनातज्ज्ञातंदुःखबंधनम् ॥ स्वप्नेसमेत्यकथितंराज्ञेराज्ञ्यैचसत्वरम् ॥ १९ ॥ ॥ हरिरुवाच ॥ ॥ अहोनयुक्तंकृतवानसित्वंवीरबाहुक ॥ मुंचमुंचत्विमौराजन्दंपतीयौत्वयाधृतौ ॥ २० ॥ अधिमासव्रतफलंजातमक्षयमेतयोः ॥ प्राग्भवेपिनिर्धनयोर्मामुद्दिश्यकृतंचयत् ॥ २१ ॥ कुंकुमांजनसिंदूरस्रक्तांबूलदलादिकम् ॥ प्रक्षालितेपिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दनेनयातिविलयंस्वयम् ॥ २२ ॥ ततोनदोषोनृपतेगुणवत्याःप्रियस्यच ॥ नकृतंतवपत्न्याचयद्व्रतंमेसुदुर्लभम् ॥ २३ ॥ पुत्रशोकाकु
लादीनातेनजाताविशांपते ॥ तच्छ्रुत्वासहसोत्थायवीरबाहुर्नृपस्तदा ॥ २४ ॥ स्वप्नवृत्तांविचिंत्याशुपत्न्यैसर्वन्यवेदयत् ॥ राजपत्न्या
पिकथितंमयापिस्वप्नमीदृशम् ॥ २५ ॥ लब्धंविलोकितंचैवसख्याप्रक्षालितंमुखम् ॥ कारागृहंतदागत्यनृपतिःप्रिययासह ॥ २६ ॥ स्वयं
प्रक्षालयामासगुणवत्यामुखांबुजम् ॥ यावद्दर्शयतेपत्न्यैतावदेवविभूषिता ॥ २७ ॥ पूर्ववद्दृदृशेसापिलज्जितौतौस्वचेतसि ॥ ततःप्रमुदि
तंसर्वंराजामात्यजनादिकम् ॥ २८ ॥ विमोच्यबंधनाद्राजावस्त्रादिभिरपूजयत् ॥ कृतांजलिपुटःस्थित्वाक्षमाप्यचपुनःपुनः ॥ २९ ॥ पुन
रेवागतेकालेमलमासव्रतंशुभम् ॥ सर्वैचकुर्यथाशास्त्रंलोकाश्चश्रीपतिप्रियम् ॥ ३० ॥ तद्व्रतस्यप्रभावेणजातास्तेसुखभागिनः ॥ तदाप्र
भृतिविख्यातंव्रतमेतदभूद्भुवि ॥ ३१ ॥ सुखदंसर्वलोकानांदुःखदारिद्र्यनाशनम् ॥ पुत्रपौत्रर्द्धिदंलोकेधनधान्यविवर्धनम् ॥ ३२ ॥ करोति
योमद्व्रतमेतदुत्तमंनरोथनारीभुविपापकंचुकम् ॥ विहायभुक्त्वासततंयथेप्सितंसयातिवैकुंठपुरंपरात्परम् ॥ ३३ ॥ ॥ इति श्रीपद्मपुराणे
मलमासमाहात्म्येस्नानादिफलयोगेबंधमोक्षोनामषड्विंशोऽध्यायः ॥ २६ ॥ छ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मलमासव्रतंवक्ष्येशृणुदेवि
समाहिता ॥ विधानंतस्यवक्ष्यामिशृणुष्वगदतोमम ॥ १ ॥ सर्वपापहरंपुण्यंसर्वदुःखनिबर्हणम् ॥ सर्वलोकेषुविख्यातंमन्मासव्रत
मुत्तमम् ॥ २ ॥ येनचीर्णेनपापानांशतकोटिःप्रशाम्यति ॥ असंक्रांतस्यमासस्यकर्तव्यंनियतःशुचिः ॥ ३ ॥ स्नानंकुर्याद्यथा
चारंदंतधावनपूर्वकम् ॥ शुक्लांबरधरःशुद्धोगृहमागत्यवाग्यतः ॥ ४ ॥ प्रक्षाल्यपादावाचम्यसंस्मरन्पुरुषोत्तमम् ॥ अव्रणंकलशं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थाप्यस्वर्णमूर्तिंप्रतिष्ठितम् ॥ ५ ॥ देवार्चनादिकंकृत्वापश्चात्संकल्पपूर्वकम् ॥ लक्ष्मीनारायणंदेवमर्चयेद्भक्तिभावतः ॥ ६ ॥
आवाहनासनाद्यैश्चगंधपुष्पादिभिर्व्रती ॥ पुरुषोत्तमायनमःपूजयेद्भक्तिभावतः ॥ ७ ॥ गीतवाद्यैश्चनृत्यैश्चपुराणपठनादिभिः ॥ स्तो
त्रैराराधयेद्देवंव्रतकृद्वाग्यतःशुचिः ॥ ८ ॥ मलमासेनिराहारःस्थित्वादेवतवाज्ञया ॥ भोक्ष्येहंपुंडरीकाक्षपरेह्निशरणंमम ॥ ९ ॥
इतिनियममंत्रः ॥ इतिविज्ञाप्यदेवेशमर्घ्यंदद्यादथेंदवे ॥ क्षीरोदार्णवसंभूतगृहाणार्घ्यंमयेरितम् ॥ १० ॥ कृतांजलिपुटोभूत्वाप्रार्थयेत्त
दनंतरम् ॥ तिष्ठन्पूर्वमुखोभूत्वापश्यन्निंदुंचसत्तमम् ॥ ११ ॥ नमःशुक्लांशवेतुभ्यंद्विजराजायतेनमः ॥ रोहिणीपतयेतुभ्यंपुरुषोत्त
मनमोस्तुते ॥ १२ ॥ ततश्चजागरंकृत्वापुराणश्रवणादिभिः ॥ जितेंद्रियोवशीशुद्धःपाखंडालापवर्जितः ॥ १३ ॥ ततःप्रातः
प्रकुर्वीततद्विधानंवदामिते ॥ मंडलंकारयेद्दिव्यंचतुरस्रंसुमंगलम् ॥ १४ ॥ शोभितंवनमालाभिर्वितानध्वजराजितम् ॥ बहुदीप
समाकीर्णंकिंकिणीरवशोभितम् ॥ १५ ॥ पर्णकैश्चामरैश्चैवकलशैश्चसमावृतम् ॥ तन्मध्येसर्वतोभद्रंपंचवर्णविराजितम् ॥ १६ ॥
कृत्वाजलान्वितंकुंभंन्यस्येत्तस्योपरिद्विजः ॥ लक्ष्मीनारायणंदेवंपूर्णपात्रोपरिन्यसेत् ॥ १७ ॥ पंचामृतेनसंस्थाप्यगंधपुष्पादिभिः
क्रमात् ॥ भक्ष्यभोज्यादिनैवेद्यैःपूजयेत्संयतेंद्रियः ॥ १८ ॥ जागरंश्रद्धयाकृत्वाप्रातःपूर्ववदर्चयेत् ॥ आचार्यायप्रदातव्याप्र
तिमादक्षिणान्विता ॥ १९ ॥ प्रार्थनामंत्रः ॥ पुरुषोत्तमहरमेयन्मयापूर्वसंचितम् ॥ पूजितस्त्वंवसिष्ठेनविश्वामित्रेणजह्नुना
॥ २० ॥ नाम्नावाविष्णुमंत्रेणयथासंख्यजपेनच ॥ प्रीयतांमेरमाकांतदेहिमेवांछितंफलम् ॥ २१ ॥ एवंद्वादशकुंभेषुसंपूज्यगरुड

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वजम् ॥ होमस्तत्रप्रकर्तव्यस्तोषणार्थंजगत्पतेः ॥ २२ ॥ सप्तप्रदक्षिणंकृत्वापश्चाद्दानानिदापयेत् ॥ मल्लिम्लुचेविधेयानिदानानि
विविधानिच ॥ २३ ॥ दंपतीपरिधानंचपदमष्टविधंतथा ॥ तिलपात्रंघृतपात्रंजलपात्रमुपानहौ ॥ २४ ॥ शय्यांसोपस्करां
दद्याद्वित्तशाठ्यविवर्जितः ॥ भोजयेद्द्विजदांपत्यान्भूषयेद्वस्त्रभूषणैः ॥ २५ ॥ तांबूलंदक्षिणांदद्यात्तेभ्योदानानिशक्तितः ॥
सुवर्णरजतंक्षौमंधान्यमाविकमौर्णिकम् ॥ २६ ॥ पयस्विनीसवत्सागौर्नानोपस्करसंयुता ॥ कंबलाजिनरत्नानिवासांसि
विविधानिच ॥ २७ ॥ ब्राह्मणान्भोजयेत्पश्चाद्विभवाद्यनुसारतः ॥ इतिकृत्वाव्रतंसम्यक्सपुत्रःसकलत्रकः ॥ २८ ॥ सर्वपापविनिर्मु
क्तकुलायुतसमन्वितः ॥ प्रयातिविष्णुभवनंयोगिनामपिदुर्लभम् ॥ २९ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येव्रतयोगेस्नानवि
धानंनामसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ अथव्रतंप्रवक्ष्यामिमलमासिकसंज्ञितम् ॥ सर्वपापहरंपु
ण्यंपुरुषोत्तमहर्षदम् ॥ १ ॥ ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणांचसत्तमे ॥ सर्वदुःखोपशमनंसंसारोच्छेदकारणम् ॥ २ ॥ अथवातुल
सीसेवाशून्यलिंगप्रपूजनम् ॥ गंगास्नानमवाप्नोतिसर्वतीर्थफलंभवेत् ॥ ३ ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ तावद्युगसहस्रा
णिविष्णुनासहमोदते ॥ ४ ॥ सर्वपापहरंकर्ममलमासव्रतंचरेत् ॥ पूर्ववत्पूजनंकृत्वास्तोत्रमेतदुदीरयेत् ॥ ५ ॥ नमःपुरुषोतमाख्य
नमस्तेविश्वभावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ ६ ॥ येनेदमखिलंजातंयत्रसर्वंप्रतिष्ठितम् ॥ लयमेष्यतियत्रैतत्तंप्रपन्नो
स्मिकेशवम् ॥ ७ ॥ परेशपरमानंदपरात्परतरःप्रभुः ॥ चिद्रूपश्चित्परिज्ञेयःसमेकृष्णःप्रसीदतु ॥ ८ ॥ कृष्णंकमलपत्राक्षंरामंरघुकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोद्भवम् ॥ नृसिंहंवामनंविष्णुंस्मरन्यातिपरांगतिम् ॥ ९ ॥ वासुदेवंवराहंचकंसकेशिनिषूदनम् ॥ पुराणपुरुषंयज्ञपुरुषंप्रणतोस्म्य
हम् ॥ १० ॥ अनादिनिधनंदेवंशंखचक्रगदाधरम् ॥ त्रिविक्रमंहलधरंप्रणतोस्मिसनातनम् ॥ ११ ॥ यइदंकीर्तयेन्नित्यंस्तोत्राणामु
त्तमोत्तमम् ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ॥ १२ ॥ इतिश्रुत्वाततोविष्णुंब्राह्मणांश्चप्रपूजयेत् ॥ आचार्यंपूजयेत्पश्चाद्दक्षिणा
च्छानादिभिः ॥ १३ ॥ शृणुदेविप्रवक्ष्यामिमहालक्ष्मीकथानकम् ॥ सर्वपापप्रशमनंसर्वदुःखनिबर्हणम् ॥ १४ ॥ ॥ आसीत्पुराकृ
तयुगेसुमतिर्नामभूपतिः ॥ सोमवंशोद्भवःश्रीमान्सप्तद्वीपैकराट्स्वयम् ॥ १५ ॥ धर्मात्मासत्त्वसंपन्नःसर्वसंपद्विभूषितः ॥ सदाहरिकथासेवी
हरिपूजापरायणः ॥ १६ ॥ हरिभक्तिपरोनित्यंशुश्रूषुरनहंकृतिः ॥ पूज्येषुपूजानिरतःसर्वभूतहितोगुणी ॥ १७ ॥ तस्यभार्यामहाभागासर्व
लक्षणसंयुता ॥ पतिव्रतासुष्ठमतीतावुभौचरतोव्रतम् ॥ १८ ॥ अधिमासाभिधंनित्यमुभौजातिस्मरौपरौ ॥ अन्नदानरतौनित्यंजलदानपरा
यणौ ॥ १९ ॥ तटाकारामप्रासादानसंख्यातान्वितेनतुः ॥ आययौबहुभिःशिष्यैर्द्रष्टुकामोंगिरस्सुतः ॥ २० ॥ मुनिमांगिरसंदृष्ट्वासमायांतं
जनेश्वरः ॥ प्रत्युद्ययौसपत्नीकःपूजाभिर्बहुविस्तरम् ॥ २१ ॥ कृतातिथिक्रियंशांतंकृतासनपरिग्रहम् ॥ नीचासनगतोभूपःप्रांजलिर्मुनिम
ब्रवीत् ॥ २२ ॥ ॥ राजोवाच ॥ ॥ भगवन्कृतकृत्योऽस्मिभवदागमनेनच ॥ सतामागमनंसंतःप्रशंसंतिसुखावहम् ॥ २३ ॥ यत्रस्या
न्महतांप्रेमतत्रस्युःसर्वसंपदः ॥ यशःकीर्तिर्धनंपुत्राइतिप्राहुर्विपश्चितः ॥ २४ ॥ यत्रवृद्धिंगमिष्यंतिश्रेयांस्यनुदिनंमुने ॥ तत्रसंतःप्रकुर्वंतिम
हतींकरुणांप्रभो ॥ २५ ॥ योमूर्ध्निधारयेद्ब्रह्मन्महत्पादतलोदकम् ॥ सस्नातःसर्वतीर्थेषुपुण्यात्मानात्रसंशयः ॥ २६ ॥ ममपुत्राश्चदाराश्चसंप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्त्वयिसमर्पिता ॥ ममकायश्चशांतात्मन्ब्रह्मन्किंकरवाणिते ॥ २७ ॥ विनयावनतंभूपंनिरीक्ष्यसमुनीश्वरः ॥ स्पृशन्करेणराजानंप्रत्युवाचाति
हर्षितः ॥ २८ ॥ राजन्यदुक्तंभवतातत्सर्वंत्वत्कुलोचितम् ॥ विनयावनताःसर्वेचक्रुःश्रेयोलभंतिते ॥ २९ ॥ धर्मंचार्थंचकामंचमोक्षंचनृ
पसत्तम ॥ विनयाल्लभ्यतेसर्वंविनयात्किंनलभ्यते ॥ ३० ॥ प्रीतोस्मितवभूपालसन्मार्गपरिवर्तिनः ॥ स्वस्तितेस्तुमहाभागयत्पृच्छा
मितदुच्यताम् ॥ ३१ ॥ त्वामद्याचारनिरतंसर्वसंपत्समावृतम् ॥ नित्यंव्रतपरांभार्यांदृष्ट्वातेप्रीतिमानहम् ॥ ३२ ॥ अर्हणाबहुधा
संतिहरिसंतुष्टिकारिकाः ॥ कथमेतद्धितेलब्धंयथावद्वक्तुमर्हसि ॥ ३३ ॥ ॥ इति श्रीपद्मपुराणेमलमासमाहात्म्येउद्यापनकथनंनामाऽ
ष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ॥ शृणुष्वभगवन्सर्वंयत्पृच्छसिवदामितत् ॥ आश्चर्यभूतंसुमह
दावयोश्चरितंविभो ॥ १ ॥ अहमासंपुरावैश्योनाम्नावीरइतिश्रुतः ॥ महापातकसंसर्गीविप्रद्रव्यापहारकः ॥ २ ॥ कुमार्गनिरतोनित्यं
सर्वलोकहितेरतः ॥ पिशुनोदेवविद्वेषीदेवद्रव्यापहारकः ॥ ३ ॥ गोघ्नश्चब्रह्महाचोरःसर्वप्राणिवधेरतः ॥ नित्यंनिष्ठुरवक्ताचपापी
वेश्यापरायणः ॥ ४ ॥ स्थितेएवंमदाढ्येचकश्चित्कालोमहान्गतः ॥ सर्वैर्बंधुजनैर्मुक्तोदुःखाद्धनमुपागतः ॥ ५ ॥ मृगमांसाशनोनि
त्यंतथामार्गनिरोधकः ॥ एकाकीदुःखबहुलोनिवसन्निर्जनेवने ॥ ६ ॥ एकदाक्षुत्परिश्रांतोदुःखितोतिपिपासितः ॥ जीर्णंदेवालयंप
श्यञ्छ्रीविष्णोर्विजनेवने ॥ ७ ॥ हंसकारंडवाकीर्णंतत्समीपेमहत्सरः ॥ पर्यंतवनपुष्पौघसहितंतन्मुनीश्वर ॥ ८ ॥ अपिबंतत्रपानी
यंतत्तीरेविगतश्रमः ॥ अथेयमागतासाध्वीममपत्नीसतीप्रिया ॥ ९ ॥ नाम्नाकुलीनाविख्यातासुष्ठुमत्यथदुःखिता ॥ बंधुवर्गपरित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तादुःखिताजीर्णविग्रहा ॥ १० ॥ ब्रह्मन्क्षुत्तृट्परिश्रांताशोचंतीममतत्क्रियाम् ॥ दैवयोगात्समायाताभ्रमंतीविजनेवने ॥ ११ ॥ इमां
दुःखवतींदृष्ट्वाजातामेविपुलाघृणा ॥ मयादत्तंजलंचास्यैमहद्धनफलंतथा ॥ १२ ॥ गतश्रमाचसाब्रह्मन्मयादृष्टायथातथम् ॥ मामुवाचवने
चेयंममदुःखेनदुःखिता ॥ १३ ॥ ॥ सुष्ठुमत्युवाच ॥ ॥ स्वामिन्किमर्थमद्यापिपापंकर्तुमिहोद्यमः ॥ ज्ञानेनाज्ञानतोवापिपापंकुर्वंतियेन
राः ॥ १४ ॥ स्वकर्मक्षयपर्यंतंमहापातकिनोपिच ॥ तिष्ठंतिनरकेघोरेयावदाचंद्रतारकम् ॥ १५ ॥ पूर्वसंचितपापानांनदृष्टानिष्कृतिर्हिनः ॥
किमर्थंपापकर्माणिकुर्वंतिहिपुनःपुनः ॥१६॥ श्रुतिप्रणिहितोधर्मःसत्यंसत्यंनसंशयः ॥ किंत्वार्यनियतान्धर्मान्प्रवक्ष्यामियथातथम् ॥१७॥
अंतकालेचसंप्राप्तेयन्नामविवशोगृणन् ॥ प्रयातिविष्णुसालोक्यंपूर्वपुण्यप्रभावतः ॥ १८ ॥ उत्क्रांतिकालेयन्नामश्रुत्वापापैरभिष्टुतः ॥ लभते
परमंस्थानंकिमुशुश्रूषणेरतः ॥ १९ ॥ महापातकयुक्तोवायुक्तोवासर्वपातकैः ॥ यतीनांविष्णुभक्तानांपरिचर्यापरायणः ॥ २० ॥ लभतेभग
वद्भक्तिंभुक्तिमुक्तिप्रदायिनीम् ॥ मुहूर्तंवामुहूर्तार्धंयस्तिष्ठेद्धरिमंदिरे॥२१॥उपलेपनकर्तारःसम्मार्जनपरायणाः ॥ ऐहिकामुष्मिकफलंतेषांभवति
निश्चितम् ॥ २२ ॥ मलमासव्रतंचापिश्रुतंचबहुविस्तरम् ॥ तत्कुरुष्वमहाभागयदिश्रेयोभिवांछसि ॥ २३ ॥ एवमाभाषितंश्रुत्वानिश्चयोभू
त्सुखावहः ॥ ततःपूर्वोक्तसद्धर्माःकृतामेशक्तितोमुने ॥ २४ ॥ एवंबहुतिथेकालेजातंपंचत्वमावयोः ॥ तेनव्रतप्रभावेनजातौजातिस्मरौभुवि ॥
॥ २५ ॥ पूर्वजन्मार्जितंसर्वंमैहिकंचलयंगतम् ॥ पापंहिदुःखदंसर्वंमलमासव्रतादरात् ॥ २६ ॥ तस्माज्ज्ञातप्रभावोहंतदारभ्यमहामुने ॥चरा
मिव्रतमेतत्तुयावदाजीवनावधि ॥२७॥ श्रीकृष्णउ०॥ तदाचरणमात्रेणसराष्ट्रोराजनायकः ॥ वैकुंठमगमद्देविपुण्यकोट्यापिदुर्लभम् ॥ २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्भागवतैःसर्वैरनुष्ठेयोधिमासकः ॥ विष्णुतुष्टिकरोनित्यंवाञ्छितार्थप्रदायकः ॥ २९ ॥ मलमासस्यमाहात्म्यंशृण्वंतोयेनराभुवि ॥
पुत्रपौत्रादिकंतेषांवाञ्छितंसर्वदाप्रिये ॥ ददातिपुंडरीकाक्षोनात्रकार्याविचारणा ॥ ३० ॥ एकाध्यायमपिश्रुत्वाभक्तिभावेनमानवः ॥
सर्वतीर्थेषुसुस्नातोजातोह्यत्रनसंशयः ॥ ३१ ॥ विष्णोर्गुणानुकथनंश्रवणंचविशेषतः ॥ बुधैश्चसर्वदाकार्यंनित्यंश्रेयस्करंमहत् ॥ ३२ ॥
सर्वदाश्रवणंकर्तुंशक्यतेनयदिक्वचित् ॥ मलमासेविशेषेणप्रत्यहंश्रवणंबुधैः ॥ ३३ ॥ कर्तव्यंसर्वथाभक्त्यात्रिंशन्मासात्मकंफलम् ॥ प्राप्नुवं
तिमहात्मानोनात्रकार्याविचारणा ॥३४॥ मलमासोगतोयेषांश्रवणेनविनानघः ॥ त्रिलोकस्थोमलःसर्वस्तेषांपततिमस्तके ॥ ३५ ॥ वाचकः
पूजितःश्रुत्वायैर्वस्त्रादिभिरादरात् ॥ मलमासाधिदेवोहंतेषांतुष्टोनसंशयः ॥ ३६ ॥ एतत्तेदेविकथितंयथास्थितमिदंप्रिये ॥ ३७ ॥ ॥ इति
श्रीपद्मपुराणेमलमासमाहात्म्येऽपूर्वकथनंनामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ श्री० ॥ ॥ छ ॥ ॥

इदं पुस्तकं मोहमय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये
"श्रीवेङ्कटेश्वर" स्टीम् मुद्रणालये मुद्रयित्वा प्रकाशितम्,
शके १८२९, संवत् १९६४.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विक्रय्यग्रंथाः ।

नाम.	की०
जयंतीमाहात्म्य–(रामजयन्ती नृसिंहजयन्ती कृष्णजयन्ती वामनजयन्ती)...	≡ ⌋
गोमाहात्म्य–भाषाटीकासमेत (गौ की महिमा) ...	⌐ ⌋
सावित्र्युपाख्यान–भाषाटीकासमेत (पतिव्रताका अपूर्व वर्णनहै)	॥ ⌋
महालक्ष्मीचरित्र–(उपाख्यान) भाषाटीकासमेत (लक्ष्मीदेवीकी अपूर्व कथा है)	≡ ⌋
श्रीविन्ध्यवासिन्युपाख्यान–भाषाटीकासमेत (विन्ध्यवासिनीदेवीकी अपूर्व कथाहै)...	≡ ⌋

नाम.	की०
एकादशीमाहात्म्य–भाषाटीकासमेत (२६ एकादशी व्रतादिकका फल और ऐतिहासिक माहात्म्य) रफ	॥। ⌋
" तथा ग्लेज	१ ⌋
एकादशीमाहात्म्य–मूल टिप्पणी सह	। ≡ ⌋
कार्त्तिकमाहात्म्य–मूल (पद्मपुराणका) इसमें कार्तिक स्नानविधि और वृंदा जालंधरोपाख्यानादिहैं ...	॥ ⌋
कार्त्तिकमाहात्म्य–भाषाटीकासह	॥। ⌐ ⌋
चातुर्मासमाहात्म्य–	॥ ⌋

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाम.	की०
मार्गशीर्षमाहात्म्य–...	।=)
पौषमाहात्म्य–स्नानवर्णन दीपदानमहिमा धनुर्मासमाहात्म्य नारायणव्रत नानादान विष्णुपूजा धात्री भोजनादि महिमाहै	।=)
माघमाहात्म्यमूल–मणिशैलवर्णन माघस्नानप्रशंसा शालग्रामशिलामहिमा प्रयागस्नान प्रशंसादि वर्णन हैं ...	।≡)
माघमाहात्म्य–भाषाटीकासह	१)
फाल्गुनमाहात्म्य–इसमें होलिका(हुताशनी)का माहात्म्य और तीर्थस्नानमा० विविधदानविधि लंबकर्णाख्यान शिवरात्रिमा०तपस्यामा० आदि वर्णन हैं... ...	।≡)

नाम.	की०
वैशाखमाहात्म्य–इसमें भगवद्ध्यान,देवशर्मोपाख्यान,चित्रोपाख्यान,प्रेतोपाख्यान,वैशाखस्नाननियमादि वर्णितहैं ...	॥)
वैशाखमाहात्म्य–भाषाटीकासह	१)
श्रावणमाहात्म्य–इसमें श्रावणव्रतोद्देश नक्तव्रतलक्षपूजा मासोपवास रविवार व्रतादि सोमवार व्रत मंगलागौरीव्रत बुध गुरु शुक्र शनिव्रत पवित्रारोपण जयन्ती व्रतादि वर्णनहैं	।≡)
भाद्रपदमाहात्म्य–इसमें गणपतिपूजा,दूर्वाव्रतपूजा,ऋषिपूजा, ललितापूजा, महालक्ष्मीपूजा,गोत्रिरात्रव्रतकथादि,वर्णनहैं	।≡)
पुरुषोत्तममाहात्म्यमूल–इसमें अधिक मासका व्रतादिक विधान अपूर्व है...	॥=)
" तथा भाषाटीका समेत	॥।=)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाम.	की०
कोकिलामाहात्म्य—"अधिकआषाढमासमाहात्म्य" ...	॥।)
बद्रीनारायणमाहात्म्य—भाषाटीका समेत बद्रीनारायणके समस्ततीर्थोंका माहात्म्य	॥)
वैद्यनाथमाहात्म्य—भाषाटीका वैद्यनाथजीका माहात्म्य और देवी देवताओंके ध्यान इत्यादि वर्णित हैं... ...	१)
केदारमाहात्म्य—केदार और गंगाजीका माहात्म्य है ...	≡)
रुद्रयामलान्तर्गत—केदारकल्प—सदेहकैलास शिवलोकगमन—उत्तराखण्डकी पवित्र भूमिका माहात्म्य किसीसे छिपा नहीं है जहांसे पतितपावनी गंगादि नदी निकलकर संसारके कलुषको क्षालित कर रही हैं । उसी पावनभूमिमें केदारक्षेत्रभीहै—जिसमें अनेक तीर्थ और अपूर्व पुण्यको देनेवाले स्थल हैं । उन सबका माहात्म्य तथा औरभी कितनेही प्रयोग मन्त्र तन्त्र वशीकरणादि सिद्धि ४४ पटलोंद्वारा इसमें वर्णित हैं	१॥)
अयोध्यामाहात्म्य—(अवधपुरीके तीर्थ और देवस्थानोंका माहात्म्य	॥)

पुस्तक मिलनेका पता—खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" स्टीम् प्रेस—मुंबई.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.01.20 15:01
,TRANSFERRED=2020/01/22 at 15:29:00
,PAGES=67
,TYPE=STD
,NAME=S0002622
,Book Name=M-2457-MALMAS MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection